अथवैयाकरणभूषण
सारः॥ श्री॥ श्री॥ श्री॥

१

श्रीगणेशाय नमः। श्रीलक्ष्मीरमणं नौमि गौरीरमणरूपिणं। स्फोटरूपं य
तः सर्वं जगदेतद्विवर्तते॥१॥ अशेषफलदातारं भवाब्धितरणे तरिं॥ शेषाशेषा
र्थलाभार्थं प्रार्थये शेषभूषणं॥२॥ पाणिन्यादिमुनीन्प्रणम्य पितरं रंगो
जिभट्टाभिधं द्वैतध्वांतनिवारणादिफक्किकां पुंभावे वाग्देवतां॥ दुंढिं
मौनमजैमिनीयवचनव्याख्यातृभिर्दूषितान्। सिद्धांतानुपपत्तिभिः ता
प्रकटये तेषां वचो दूषये॥३॥ प्रारिप्सितप्रतिबंधोपशमनाय श्रीफ
णिस्मरणरूपं मंगलं शिष्यशिक्षायै निबध्नन्। चिकीर्षितं प्रतिजा
नीते॥ फणिभाषितभाष्याब्धेः शब्दकौस्तुभ उद्धृतः। तत्र निर्णीत
एवार्थः संक्षेपेणेह कथ्यते॥१॥ उद्धृत इत्यत्रास्माभिरिति शेषः।

भाष्याब्धेः शब्दकौस्तुभ उद्धृत इत्युक्तिः शब्दकौस्तुभोक्तानामर्थानामाधु
निकोत्प्रेक्षितत्वनिरासाय। अन्यथा तन्मूलकस्यास्य ग्रंथस्याप्याधुनिकोत्प्रेक्षितत्वा
पत्तौ पाणिनीयानामनुपादेयतापत्तेः। तत्र निर्णीत इत्युक्तिरेतावधिकजिज्ञासुभिः श
ब्दकौस्तुभ एव द्रष्टव्य इति ध्वनयितुं। प्रतिज्ञातमाह। फलव्यापारयोर्धातुराश्रये
तु तिङः स्मृताः। फले प्रधानं व्यापारस्तिङर्थस्तु विशेषणं॥२॥ धातु
रित्यत्र स्मृत इति वचनविपरिणामेनान्वयः। फलं विक्लित्त्यादि। व्या
पारस्तु साध्यत्वेनाभिधीयमाना क्रिया। उक्तं च वाक्यपदीये। याव
त्सिद्धमसिद्धं वा साध्यत्वेनाभिधीयते। आश्रितक्रमरूपत्वात्सा
क्रियेत्यभिधीयते इति। न च साध्यत्वेनाभिधानेमानाभा

२ वः। पचतिपाकः। करोतीति कृतिरित्यादौ धात्वर्थावगमात्। विशेषेऽपि क्रियां
तराकांक्षानाकांक्षयोर्दर्शनेनैवमानत्वात्। तथा च क्रियांतरा
कांक्षानुत्थापकतावच्छेदकं रूपं साध्यत्वं। तद्रूपवत्त्वमसत्त्वभूतत्वं।
एतदेवादाय असत्त्वभूतो भावश्च तिङ्पदैरभिधीयत इति वाक्यपदी
यं द्रष्टव्यं। अयं च व्यापारः फूत्कारत्वाधःसंतापनत्वयत्नत्वादि
तत्तद्रूपेण वाच्यः। पचतीत्यादौ तत्तत्प्रकारकबोधस्यानुभवसिद्धत्वा
ना त्॥ न च नानार्थतापत्तिः। तदादिन्यायेन बुद्धिविशेषादेः शक्यतावच्छे
दकानामनुगमकस्य सत्त्वात्॥ आख्यातेति क्रियैकत्वव्यवस्थाप्यव २

छेदकबुद्धिविशेषैक्यमादायैव। उक्तं च वाक्यपदीये। गुणभूतैरवयवैः
ति समूहः क्रमजन्मनां। बुद्ध्याप्रकल्पिताभेदः क्रियेति व्यपदिश्यते। धा
त्वर्थं निरूपयति धर्ममात्र। आश्रये त्वेति। फलाश्रये व्यापाराश्र
ये चेत्यर्थः। फलाश्रयः कर्म व्यापाराश्रयः कर्ता। तत्र फलव्यापा
रयोर्धातुलभ्यत्वान्न तदंशे शक्तिरन्यलभ्यत्वात्। शक्यतावच्छे
दकं चाश्रयत्वं। तत्र च किं विशेषरूपमिति सुवर्थनिर्णये वक्ष्यते।
म२ नन्वेवमाश्रयस्य धात्वर्थत्वे किं मानं। प्रतीतिर्लक्षणयाऽऽक्षेपात्तथा
मानपदस्यासंभव इति चेदुच्यते। लः कर्मणि च भावे चाकर्म

केभ्य इति सूत्रमेव मानं। अत्र हि चकारादनुकर्तरि कृदिति सूत्रोक्तं क
३ र्तरीत्यनुकृष्यते। केधकृतारूपोंशाक्लिं न तच्छानित्वेन कल्पितेन्ले का
रेप्रकल्प्यो लकारः कर्मणि कर्तरि चानेन विधीयंते॥ नकारविसर्गा
दिनिष्ठां कर्मकरणादिरात्कि माद्यायद्दासादिविधानवत्। न च सूत्रे
कर्मकर्तृपदे कर्मत्वकर्तृत्वपरे। तथा च कर्तृत्वं कृतिः। कर्मत्वं च फ
लमेवार्थोऽस्त्विति शंक्यं। फलव्यापारयोर्धातुलभ्यत्वेन लकारस्य
पुनस्तत्र शक्तिकल्पनायोगात्। अथ यद्यत्रं नातद्वीयदीत्या व्यापारस्य
धात्वर्थत्वाभावान्न लकारविधिः स्यादिति चेन्न हि कृत्ताप्यप्रकृ
तेकर्मवाचित्वं न स्यात्। कर्तरि कृदिति च लः कर्मणीत्यने ३

न तुल्ययोगक्षेमं॥ अपि च मीमांसकानां कृतामिवाख्यातानामपि कर्तृवाचित्वम
स्तु। भावनायाएवाक्षेपेण कर्त्रादिवत्तीति संभवेनाच्यत्वं मास्तु। तथा सति
प्राधान्यं न स्यादिति चेन्न। पद्यमाने पत्याद्यवाक्षिप्तत्व्यतेरपि प्रा
धान्यवदुपपत्तेः। पचतीत्यादौ भावनाया विवरणदर्शनाद्वाच्य
त्वमिति चेन्न। पाकानुकूलव्यापारवतः कर्तुरपि विवरणविषय
त्वाविशेषात्। न च कर्तुर्विवरणं नास्त्येव विवरणं। पाकं करो
तीत्यत्राद्यार्थकर्मत्वविवरणवत्। इतरेतरद्वंद्वसमुच्चयावा
विवरणवद्वा। तदर्थनिर्णायकमिति वाच्यं। भावनायामपि तु
न

त्वलात्। किं च। पचति देवदत्त इत्यत्राभेदान्वयदर्शनात्कर्तृवाचकत्वमावश्य
४ कम्। पक्तृ देवदत्त इतिवत्। नन्वाऽभेदबोधे समानविभक्तिकत्वं तंत्रं तच्चा
त्र नास्तीति वाच्यम्। सोमं नयजेत स्तोकं पचति राजपुरुष इत्यादा
वप्यभेदबोधानापत्तेः॥ नच लक्षणया कर्तुरुक्तत्वात्सामानाधिकर
ण्यम्॥ पिंगाक्ष्यादियौगिकानामपि द्रव्यवाचित्वानापत्तेः॥ एवं वैश्वदेवीत्या
दितद्धितानामपि॥ अनेकमन्यपदार्थे। सास्यदेवतेत्यनुशासनेनापि पिंगे
अक्षिणी यस्याः विश्वेदेवा देवता अस्या इति विग्रहदर्शनात्॥ प्रधा
नषष्ठ्यर्थ एवानुशासनलाभात्। तथा चारुणया पिंगाक्ष्यैकहा
यन्या सोमं क्रीणाति। तिवाक्ये द्रव्यानुक्तेरारुण्यस्य च का ४

कोयान्तद्रव्ये एवान्वयप्रतिपादकारुणाधिकरणोच्छेदापत्तिः।
द्रव्यवाचकत्वसाधकमूलयुक्तेः सामानाधिकरण्यस्योत्कृती
त्योपपत्तेरिति प्रपंचितं विस्तरेण वैयाकरणभूषणे। तिङ्
इति। बोधकतारा क्रि। स्तिक्ष्वेवेत्यभिप्रेत्येदं। पदार्थं। निरू
प्यवाक्यार्थं निरूपयति। फले इत्यादि। विक्लित्यादिफलं
प्रति। तिङर्थः कर्तृकर्मसंख्याकालाः। तत्र कर्तृकर्मणी व्यापारफ
लयोर्विशेषणे। संख्या कर्तृप्रत्यये कर्तरि। कर्मप्रत्यये कर्मणि। समानप्रत्ययोपा
त्तत्वात्। तथा चाख्यातार्थसंख्याप्रकारकबोधं प्रति आख्यातजन्यक

५ न्तृकर्मोपस्थितिर्हेतुरिति कार्यकारणभावः फलितः। नैयायिकादीनामाख्यातार्थसंख्यायाः प्रथमान्तार्थ एवान्वय
त्याख्यातार्थसंख्याप्रकारकबोधे प्रथमान्तपदजन्योपस्थितिर्हेतुरिति कार्यकारणभावो बोध्यः। सोऽपि चंद्र इव
मुखं दृश्यते देवदत्तो भुङ्क्ते व्रजतीत्यादौ चंद्रत्वार्थयोराख्यातार्थानन्वयमादितराविशेषणत्वघटितत्वसति गौर
ग वं। इदं पि कर्तृकर्मणोराख्यातार्थत्वेमानाभावादिति स्पष्टं भूषणे। कालस्तु व्यापारे विशेषणं। तथाहि। वर्तमाने लडि
त्यत्राधिकाराल्लानेरिति लब्धं। तत्र धात्वर्थं वद्धात्वर्थव्यापारमेव स्वाहयतीति तत्रैव तदन्वयः। न च संख्या
वत्कर्तृकर्मणोरेव तदन्वयः शंक्यः। अतीतभावनाके कर्तरि पचतीत्यापत्तेः। अपाक्षीदित्यनापत्तेश्च। पाकाना
रंभदशायां कर्तरि सत्वे पक्ष्यतीत्यनापत्तेश्च। नापि फले तदन्वयः। फलानुत्पत्तिदशायां व्यापार [illegible]
सत्वे पचतीत्यनापत्तेः। पक्ष्यतीत्यापत्तेश्चेत्यव [illegible] धेयम्। न चामवात जडीकृत कलेव ५

रस्योत्थानानुकूलयत्नसत्वादुत्तिष्ठतीति प्रयोगापत्तिः। परयत्नस्याह्वानादप्रयोगात्। किंचिच्चेष्टादिनाव
गतो चाययुक्तिष्ठनिरुक्तप्रभावात् फलेनन्नानमिति लोकप्रतीतेरिष्टत्वात्। एवं च तिङर्थविशेषणमेव।
भावनैव प्रधानं प्रत्ययपि प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थस्यैव प्राधान्यमन्यत्र दृष्टं तथापि भावप्रधानमा
ख्यातं सत्वप्रधानानि नामानीति निरुक्तात् भूवादिसूत्रस्य क्रियाप्राधान्यबोधकभाष्याच्च धात्वर्थभाव
नाप्राधान्यमभ्युपगम्यते॥ अपि च। आख्यातार्थप्राधान्ये तस्य रेवरतादिभिः समभेदान्वयात् प्रथ
मान्तस्य प्राधान्यापत्तिः। तथा च पश्य मृगो धावतीत्यादौ भाष्यसिद्धैकवाक्यतानस्यात्॥ प्रथमान्तमृग
स्य धावनक्रियाविशेष्यत्वस्य दृशिक्रियायां कर्मत्वापत्तौ द्वितीयापत्तेः। न चैवमप्रथमासामानाधिकरण्या
च्छत्प्रसंगः। एवमपि द्वितीयादुर्वारत्वेन पश्य मृगो धावतीत्यादिवाक्यस्यासंभवापत्तेः। न च पश्येत्य
त्र तमिति कर्माध्याहार्यमिति वाक्यभेदप्रसंगात्। उक्तरूपधावनक्रियाविशेषस्यैव दर्शनकर्मत्वात्यास्य

६ प्रतिपिपादयिषितत्वात्। अध्याहारेऽनन्वयापत्तेः। एवं च भावनाप्रकारकबोधे प्रथमांतपदोपस्थितिः का
रणमिति नैयायिकोक्तं नादरणीयम्॥ किंतु आख्यातार्थकर्तृप्रकारकबोधे धातुजन्योपस्थितिर्भावना
त्वावच्छिन्नविषयतया कारणमिति कार्यकारणभावो द्रष्टव्यः। भावनाप्रकारकबोधं प्रति तु तज्जन्यो
पस्थितिर्वर्तमानत्वार्थभावनोपस्थितिरपि हेतुः। कथमन्यथा पचति भवतीत्यादावनुरोधादिति दि
क्। इत्थं च पचतीत्यत्रैकाश्रयिका पाकानुकूला भावना। पच्यत इत्यत्रैकाश्रयिका या विक्लित्तिस्तद
नुकूला भावना इति बोधः। देवदत्तादिपदप्रयोगे त्वाख्यातार्थकर्त्रादिभिन्नदर्थस्याभेदान्वयः। एवं न
श्यतीत्यत्रापि पदाभिन्नाश्रयको नाशानुकूलो व्यापार इति बोधः। स च व्यापारः प्रतियोगित्वविशिष्ट
नाशसामग्रीसमवधानः। अत एव नश्यत्तासत्त्वां नश्यति न तद्ध्वंसेन नष्टः तद्धासित्वे नंक्ष्यतीति प्रयोगः। दे
वदत्तो नामानि रक्षतीत्यादौ च देवदत्ताभिन्नाश्रयको ज्ञानेच्छाद्यनुकूलो वर्तमानो व्यापार इति बोधः ६

92

भवतां तत आश्रयत्वेनैवेति निरीक्ष्योक्तम्॥ नन्वाख्यातस्य कर्तृकर्मणोः शक्तत्वे पचतीत्यत्रोभयबोधापत्तिः। क
र्तृमात्रबोधवत् कर्ममात्रस्यापि बोधापत्तिरित्यतस्तात्पर्यग्राहकमाह॥ ॥फलव्यापारयोस्त
त्र फलं तङ्यक्चिणादयः॥ व्यापारे शप्श्नमाद्यास्तु द्योतयन्त्याश्रयान्वयम्॥ ५॥ ॥तङादयः फ
ले आश्रयान्वयं द्योतयन्ति। फलान्वय्याश्रयस्य कर्मत्वात् तद्द्योतकाः। व्यापाराश्रयस्य कर्तृत्वात् तद्द्योत
का इति समुदायार्थः। द्योतकत्वं च तात्पर्यग्राहकत्वं। नन्वेवं कुमारः सुप्तोऽरण्ये इत्यबोधि सरत्यादौ प
च्यते ओदनः स्वयमेवेत्यादौ च व्यभिचारः। कर्मणः कर्तृत्वविवक्षायां कर्तरि लकारे सति कर्मवत्कर्म
णा तुल्यक्रियः इत्यतिदेशेन यगात्मनेपदचिण्चिण्वदिटामतिदेशात् यगादिसत्वेऽपि कर्तुरेव बोधा
द्व्यापारे एवाश्रयान्वयात् अबोधोऽध्यस्यापि तुष्यतेः कर्तरि लुङ्ङ्विः तस्याद्योतकत्वेनेति चिण् चिणो लुगि
ति लुक् इति साधनादित्याशयेनाह॥ ॥उक्तमर्थं कर्मकर्तृविषयादौ विपर्ययात्॥ तस्यादयोचितं ते

93

येषोनकर्तृत्वं प्रयागमम्॥४॥ ॥कर्मकर्तृविषया रौ। पच्यते ओदनः स्वयमेवेत्यादौ। एकौदनाभिन्नाश्रयकः
७ पाकानुकूलो व्यापार इति बोधः। कर्मादिस्थावादिपदस्थाहुं। अन्यत्राप्यन्यत्रिशेषणतामपूर्वकएककार
दविषयकज्ञानानुकूलरूपाभिन्नाश्रयको व्यापार इति बोधः। ब्यतोऽचिनमिति। सकर्मकधातुसमभि
व्याहृतभावसाधारणविधिविधेयचिण्प्रयगादिकर्मयोगेन कृमिति भावः। एवं लडाद्युते भावनाया अवा
च्यत्वे यदनः पाभाकरादीन्यानि सूची कृत्वाहृन्यायेनसोपपत्तिकं वाक्यार्थमुपवर्ण्य फलव्यापारयोरि
तिप्रतिज्ञातं धातोर्व्यापारवाचित्वं व्यवस्थापयति॥ ॥व्यापारो भावना सैवोत्पादना सैव च क्रिया॥ कृ
ञोऽकर्मकत्वापत्तेर्नहि यत्नोऽर्थ इष्यते॥ ॥पचति पाकं उत्पादयति पाकानुकूला भावनानानादृश्युत्पा
दनेत्यादिविवरणाद्धि क्रियमाणस्यापि तद्धात्वर्थत्वेनेति भावः। व्यापारपदं फूत्कारादीनामप्यत्वानाम
पि फूत्कारत्वादिरूपेणवाच्यतां ध्वनयितुमुक्तं। अतएव पचतीत्यत्राधःसंतापनत्वफूत्कारत्वचुल्यु ७

परिधारणत्वयत्नत्वादिभिर्बोधः सर्वैरिष्टः॥ न चैवं शक्यतावच्छेदकत्वे गौरवापत्त्या कृतित्वमेव तदव
च्छेदकं वाच्यम् रथो गच्छति जानातीत्यादौ व्यापारत्वादिप्रकारकबोधो लक्षणयेति नैयायिकरीतिः स्या
दिति॥ शक्यतावच्छेदकत्वस्यापि तत्त्वस्य नानावच्छेदकत्ववत् गुरुणि संभवात् नयोर्वैयर्थ्ये बीजाभावात्।
न च पचति पाकं करोतीति यत्नार्थककरोतिना विवरणाद्यत्न एवार्थ इति वाच्यम्। रथो गमनं क
रोति बीजादिना अंकुरः कृत इति दर्शनात् कृञो यत्नार्थकताया एव असिद्धेरिति। किं च भावनाया अ
वाच्यत्वे एवं भावयतीत्यत्रेव घटो भवतीत्यत्रापि हि नीयास्यात्॥ न चाचपरस्य कर्तृत्वेन तत्त्वं तत्रया
कर्मसंज्ञाया बाधान्नहि नीयेति वाच्यम्। अनुगतकर्तृत्वस्य त्वन्मते दुर्वचत्वेन घटस्याकर्तृत्वात्। कृ
त्याश्रयत्वस्य कारकचक्रप्रयोक्तृत्वस्य वा घटादावभावात्। धात्वर्थानुकूलव्यापाराश्रयत्वस्य च का
रकमात्रातिव्यापकत्वात्॥ अपि च भावनाया अवाच्यत्वे धातूनां सकर्मकत्वाकर्मकत्वविभाग उच्छिन्नः स्या

त्स्वार्थफलव्यधिकरणव्यापारवाचित्वं स्वार्थव्यापारव्यधिकरणफलवाचकत्वं वा सकर्मकत्वं भावना
णावाच्यत्वमंतरेणासंभवात्। अन्यतमत्वेन निवेशे तु नाएकस्यैवार्थभेदेनाकर्मकत्वसकर्मकत्वद्वं
नान्तरेतदपि संधायाह। फलेति। अयंभावः। व्यापारवाच्यत्वपक्षे फलमात्रमर्थ इति फलितमप्न
यायकरोतीत्यादौ फलप्रतीतेरन्यार्थत्वेशाच्यमभ्युपेयम्। तथा च पनीप्रपले इतिवत् फलस्थानीयप
लवाचकत्वाविशेषात् अकर्मकत्वापत्तिरुक्तरीत्या दुर्वारेति। तथा च न हि फलमित्यत्र फलस्थानीय। प
त्वेनेति शेषः। फलेति धात्वर्थमात्रोपलक्षणम्। सर्वेषामप्यकर्मकत्वासकर्मकता वा स्यादिति भावः॥
अथ वा। व्यापारो भावनेत्युक्तेर्न व्यापारस्य वाच्यत्वं प्रसाध्य फलांशस्यापि तत्साधयन्नैयायिकाभ्युप
गतं ज्ञानातिरुक्ताधेः केवलं ज्ञानफलादिक्रियामात्रवाचित्वं दूषयति। फलेति॥ अयंभावः। फलांश
स्यावाच्यत्वे व्यापार एव धात्वर्थः स्यात्। तथा च स्वार्थफलव्यधिकरणव्यापारवाचित्वादिरूपसकर्मकत्व

व्येदापत्तिः। न च फलनाशेऽसकर्मकत्वव्यवहारो भाक्त इति नैयायिकोक्तं युक्तं। व्यवहारस्य भाक्तत्वे कर्मणि
लकाराः संभवात्। न हि तीरे गंगापदस्य भाक्तत्वेन तत्स्नानादिकार्यं कर्तुं शक्यम्। एवं च न हि यत्नत्वरूस
त्र फलमात्रमित्यर्थः। अत एवाह॥ ॥किंतु स्यादन्नमेवातः कर्मवत्स्यात्रगायपि॥ कर्मकर्तर्यन्य
था तु न भवेत्तदृश्येरिव।६॥ ॥उक्तावर्त्तं उत्पत्तिरूपफलसहितं यत्नादिरूपार्थ इत्यर्थः। फलस्य वा
च्यत्वे युक्त्यंतरमाह॥ अत इत्यादि। यतः फलं यत्नमात्रमर्थो नेष्यते अतः। कर्मवदिति पदेन कर्म
वत्कर्मणा तुल्यक्रियः इति सूत्रं लक्ष्यते॥ अयमर्थः। यत एतस्योत्पादनार्थकता। नः पच्यते ओदनः
स्वयमेवेति वच्छि. पचते पचः स्वयमेवेति प्रयोगाद्यो युपपद्येते। अन्यथा यत्नस्य कर्मनिष्ठत्वाभावात्त
न्न स्यात्। दृशिवत्। पचादेरप्युने पचः स्वयमेवेतिना दर्शनस्य पराहतत्वात्। तथा यत्नस्यापीति न
यात्रयोगानापत्तेरिति। ननु एवं कृजादेरिव जानात्यादेरपि विषयावच्छिन्नावरणभंगादिफलवा

वै.भू. चित्त्वाद्वस्तुकृतः अन्यथा सकर्मकत्वाच्चापत्तेः। न चावृत्तायत्ते परः स्वयमेवेति किं न स्यात्। एवं ग्रामो
९ गम्यते स्वयमेवेत्यादावपि स्यादेशं कोपत्र सिद्धं स्यात्॥ ।निर्वर्त्ये च विकार्ये च कर्मवद्भाव इष्यते॥ न तु
प्राप्ये कर्मणीति सिद्धान्तो हि व्यवस्थितः॥ ५॥ ॥ईप्सितं कर्म त्रिविधम्। निर्वर्त्यं विकार्यं प्राप्यं च। तत्रा
द्ययोः कर्मवद्भावो नान्त्ये। प्राप्यत्वं च क्रियाकृतविशेषानुपलभ्यमानत्वमिति सुबर्थनिर्णये वक्ष्यते।
नत्वयं घटः केनचिद्दृष्टः ग्रामोऽयं केनचिद्गत इति शक्यं कर्मदर्शनेनानुगन्तुं। घटं करोतीति निर्व
र्त्यं सोमं सुनोतीति विकार्यं च तज्ज्ञातुं शक्यमिति न तथा प्राप्यम्। तथा च घटादेरिव ग्रामादेः प्राप्यकर्मत्वा
ल्लोकातिप्रसंग इति भावः। धातूनां फलव्यापारवाचकत्वे सति गम्यादेः पर्यायतापत्तिः क्रियावाचकत्वाविशे
षात्। फलस्योपलक्षणत्वेपि एकक्रियायाः एव पूर्वदेशविभागोत्तरदेशसंयोगजनकत्वादुक्तदोष
तादवस्थ्यमित्यपि वदन्ति। तस्मादावश्यकं सकर्मणां फलवाचकत्वमकर्मणां तु तन्निर्विवादमेव॥ ९

भूतत्वाभावमित्यादावनुशासनाच्च। अत एव द्व्यर्थः पचिरिति भाष्यं संगच्छत इति दिक्॥ ननु एवं सिध्यतु फ
लव्यापारयोर्वाच्यत्वं किंतु आख्यातवाच्यैव सा भावना न धातोः। भावप्राधान्येन यतो। प्रमाणव्यापारस्य
धात्वर्थतायाः प्रकृतिप्रत्ययोः प्रत्ययार्थस्यैव प्राधान्यमिति न्यायविरुद्धत्वात्तत्रागमे हि रस्पतर
निन्यायविरुद्धत्वाच्च॥ एवं च स्वयुक्ताख्यातार्थव्यापाराधिकरणफलवाचकत्वं सकर्मकत्वम्। आ
ख्यातार्थव्यापाराश्रयत्वं च कर्तृत्वं वाच्यमित्यादिविवरणे तेऽमीमांसकंमन्येन स्यात्॥ ॥तस्मात्करोति
र्धातोः स्याद्व्याख्यानं न त्वसौ तिङां॥ पक्वान्नत्वान्यत्कं किं कृतं पचतमित्यपि॥ ६॥ ॥तस्मादभिप्रा
यस्य हेतोः सत्त्वे स्यां फलमात्रस्य धात्वर्थत्वे ग्रामो गमनवानिति प्रतीत्यापत्तिः संयोगाश्रयत्वात्। फ
लानुत्पादशायां व्यापारसत्त्वे पाको भवतीत्यनापत्तेः। व्यापारविगमे फलसत्त्वे पाको विद्यते इत्यापत्ते
श्चापत्तुभावमात्रप्रत्ययादेरनुकूलव्यापारवाचकत्वान्नानुपपत्तिरिति। तन्न। कर्तुराख्यातवत्तनोरि

वै.भू. हविस्थित एव तद्विधानसामर्थ्याद्बोधेविभागकालानुगणस्तन्नैवयथ्यापत्तेस्तद्विरोधापत्तेश्च। अथ व्यापारो विभा
१० गार्थः स्पन्दश्च फलमिति चेन्न। हि धातुनैव सकलव्यापारलाभसंभवे नाख्यातस्य व्यापारे शक्तिकल्पने गौर
वं। इति। पचति। स्वस्य पाकं करोतीति विवरणात्करोतिर्यत्नोरेव व्याख्यानं। अतस्तदर्थविना ख्यातार्थ
त्वसाधकमिति भावः। मीमांसकोक्तं वा पक्षमुद्दूरं लक्ष्यन्तं दूषयति। नत्वित्यादिना। नासौ तिङ्कं व्याख्या
नं। पक्षता नित्यादौ अनन्वयापत्तेः॥ अयं भावः। प्रकृतिप्रत्ययौ सहार्थं ब्रूतस्तयोः प्रत्ययार्थः प्रधा
नं इत्यस्य हि विशेष्यतया प्रकृत्यर्थप्रकारकबोधं प्रति तदुत्तरप्रत्ययजन्योपस्थितिर्हेतुरिति का
र्यकारणभावः फलितः। तथा च पक्ष्वानित्यत्र पाकः कर्मप्रकारकं कृत्युप्रत्ययार्थः कर्तृप्रकारकं त
योश्चारुणाधिकरणरीत्या च स्वमाणास्तद्रीत्या चान्वयासंभवः इति प्रकृतिप्रत्ययार्थयोरन्वयानि
यमस्यैवाभावे कस्याभान्वयबोधकउक्तकार्यकारणभावः। न च संबंधमात्रमुक्तं धात्वर्थस्य धात्वर्थभाव १०

निदर्शनं

20

योः। नरैवंशनिवेशेतु व्यापारोस्यानतिप्रसक्त इति भट्टपादोक्तरीत्या संबंधसामान्येन कारकाणामन्व
यः शंक्यः। योग्यताविरहात्। अन्वयप्रयोजकरूपवत्त्वस्यनत्वात्। किं पाकेनेव कारकान्वयिनाव
च्छेदकमिति वक्ष्यते। तदेतदाविष्कर्तुं विवरणेन धात्वर्थतावच्छेदकं योः कर्मकर्तृत्वे दर्शयति। कृतवान्या
कमिति। वस्तुतः प्रत्ययार्थः प्रधानमित्यस्य प्रत्ययः प्रधानं स प्रत्ययार्थ एवेति वा यः प्रत्ययार्थः स प्रधान
मेवेति वानार्थः। अजा. अश्वा. खट्वा। इत्यस्य प्रत्ययार्थस्त्रीत्वस्यैव प्राधान्यापत्तेः। खट्वादेरनापत्ते
श्च। किंतूत्सर्गोयं विशेष्यत्वादिना बोधकस्तु तथा प्रत्ययार्थस्य तु रोधात्। अत एव नैयायिकानां प्रथमांत
विशेष्यक एव बोधः। लक्षणाया आलंकारिकाणां शक्यतावच्छेदकप्रकारकबोधोननैयायिकादी
नां परः कर्मत्वमित्यादौ विपर्ययेणापि व्युत्पन्नानां नैयायिकवैयाकरणानां बोधोनन तद्व्युत्पत्तिरहितानां
मन्येषां। तेषां तन्निराकांक्षमेवेत्यादिकं संगच्छते। अत एव प्रधानप्रत्ययार्थवचनमर्थस्यान्यप्रमाण

21

वै. भू. त्वादित्याह भगवान्पाणिनिः। प्रधानमत्र पार्थवचनेन कार्यं। अर्थस्य तथा बोधस्यान्यप्रमाणत्वात्तदनुस पु
११ नुसारित्वादिति हि तदर्थः। एवं सत्यपि नियामकापेक्षणे च भावप्रधानमाख्यातमिति वचनमेव गृह्य
तामिति सुधीभिरूह्यम्। नदागमे ह्रीनिन्यायो विवरणं चातिव्याप्तमित्याह। किंकृतं पक्वमिति। कृ
ञो विवरणं यत्नो निष्पक्वमित्यत्रापीति तत्रापि भावनावाच्यत्वादिति भावः। ननु स्तुतिङ इव कृ स्या
तामपि भावनावाच्यत्वेत्यत आह। अपीति। तथा चोभयसाधारण्येन तत्त्वनीते रुभयसाधारणो
धातुरेव वाचक इति भावः। भवद्रीत्या प्रत्ययार्थत्वेन प्राधान्यापत्तिश्चेति दृष्टव्यम्। व्यापारस्य धात्व
र्थत्वे साधकांतरमाह। किंकार्यं पचनीयं चेत्यादि दृष्टं हि कृत्स्वपि। किंच क्रियावाचकतां विना धातुत्व
मेव न॥ ९॥ ॥कार्यमित्यत्र ऋहलोर्ण्यदिति कर्मणि ण्यत्। पचनीयमित्यादौ चानीयर्। आदिना ज्यो
तिष्टोमयाजीत्यादि णिनिः करणे उपपदे कर्तरि। एते च क्रियायोगमंतरेणासंभवंतस्तद्वाच्यतां चो ११

22

धयंति। विना क्रियां कारकत्वासंभवेन तद्वाचकप्रत्ययस्याप्यसंभवात्। न च गम्यमानक्रियामादाय
कारकयोग इति भाष्ये रीतिर्युक्ता। आख्यातेपि तथात्वापत्तौ न चापि भावनाया वाच्यत्वासिध्द्यापत्तेः।
अथ लिंगसंख्यान्वयानुरोधात्कर्तुर्वाच्यत्वमावश्यकमिति तेनाक्षेपाद्भावना प्रत्ययः स्यादिति मतं। नहि
संख्यान्वयोपपत्तेराख्यातेपि कर्ता वाच्यः स्यात् पक्ववानित्यादि कालकारकान्वयानुरोधाद्भावनाया
अपि तस्यावश्यकत्वाच्चेति भावः। अपि नाहेत्वंतरसमुच्चयः। तथाहि। नरैर्भिन्नो नरभिन्नः। हरिणा
त्रातः। हरित्रात इत्यादौ कर्तृकरणे कृता बहुलमिति समासो न स्यात्। पुरुषो राज्ञो भार्या देवदत्तस्ये
त्यादिवदसामर्थ्यात्। न चाध्याहृतक्रियाद्वारा सामर्थ्यं वाच्यम् दध्योदनः गुडधाना इत्यादिवत्। अ
न्यथा चाप्यन्नेन व्यंजनं भक्ष्येण मिश्रीकरणमिति समासो न स्यादिति वाच्यं। तत्र विध्यानर्थक्याद
गत्या तथास्वीकारेपि हरिकृतमित्यादौ सा साक्षाद्धात्वर्थान्वयेनोपपद्यमानस्य कर्तृकरण इत्यस्याक्षेपेण

23

वै.भू. परंपरासंबंधेनइत्स्य योगात्। न चैकस्यां क्रियायामन्वितमेव सामर्थ्यमिति शंक्यं। अतएव पश्यतामित्या
११ देरसमर्थसमासत्वानापत्तेः॥ उद्देशापत्तौ एनः सर्वोस्तीति कपेस्तत्र एनः सर्वमस्तीति करस्यापत्तेः। न चात्र
सु समासविधायकाभावः। सह पेत्यस्य सत्वात्। अन्यथा ऽसमर्थसमासो विधायकाभावान्न स्यादिति।
किंच भावनायामस्तिङर्थत्वे भावयति पचतीति वदन्ति पचतीत्यपि स्यात्। धात्वर्थफलाश्रयत्वरू
पकर्मत्वसत्वात्। न चाख्यातार्थव्यापाराश्रयत्वेन कर्तृत्वान्न तस्य तया कर्मसंज्ञाप्राप्त्यभावादिति
वाच्यम्॥ आख्यातार्थव्यापाराश्रयत्वस्य कर्तृत्वे पाचयति देवदत्तो विष्णुमित्रेण सत्र विष्णु
मित्रस्याकर्तृतापत्तौ तृतीयानापत्तेः। ग्रामं गमयति देवदत्तो विष्णुमित्रमित्यत्र विष्णुमित्रस्याक
र्तृतापत्तौ ग्रामस्य गमिकर्मतानापत्तेश्च। तथा च ग्रामं गमयति देवदत्तो विष्णुमित्रमित्यपि न स्या
त् गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनीति गत्यर्थकर्मण्येव चतुर्थीविधानात्। एतेन १२

२४

णिजंते आख्यातार्थ उभयांतराश्रयत्वाद्देवदत्तयत्रयोः कर्तृत्वे स्यात्तम्। किंच तस्मिन्प्रयोगे च आख्या
पं तार्थस्य स्याश्रयकत्वेन आख्यातमूर्त्येदेवदत्तः पचेत्यादौ देवदत्तस्याकर्तृतापत्तेरिति दिक्॥ एवं चानुप
पत्तिमपि मानत्वेन प्रदर्शयन्नुक्तार्थस्य स्वोक्ते सिद्धत्वं निरस्यति॥ किं चेति। धातुसंज्ञाविधायकं भूवा
द्यो धातव इति सूत्रम्। तत्र भूश्च वाश्चेति द्वंद्वः। आदिशब्दयोर्व्यवस्थाप्रकारवाचिनोरेकशेषः। त
तो भूवौ आदी येषांते भूवादयः॥ तथा च भूप्रभृतयो वासदृशा धातव इत्यर्थः। तत्र क्रियावाचकत्वेन।
तथा च क्रियावाचकत्वे सति भ्वादिगणपठितत्वम् धातुत्वं पर्यवसन्नम्। अत्र क्रियावाचित्वमात्रोक्तौ
वर्जनादिरूपक्रियावाचके हिरुङ् नानेत्यादावतिव्याप्तिरिति भ्वादिगणपठितत्वमुक्तम्। तावन्मात्रो
क्तावाह॥ ॥सर्वनामाव्ययादीनां यावादीनां प्रसंगतः। न हि तस्मान्मात्रेण युक्तमित्याकरे स्फुटम्
॥१०॥ ॥गणपठितत्वमात्रोक्तौ सर्वनामाव्ययानस्यापि धातुत्वं स्यात्। तथा च यः पश्यतीत्यादौ

25

वै.भू. ११ आतो धातोरित्याकारलोपापत्तिः। ननु लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणान्न सर्वं नाम्नो
ग्रहणं तस्य लाक्षणिकत्वात् इत्यत आह। वेत्यादि। अप्यर्थे वा इत्यादावतिप्रसंगः। तादृशस्यैव गणे
पिपाठेन निर्णयासंभवात्। तथा च विकल्पार्थको वानीति प्रयोगः स्यादिति भावः। न च गतिगंध
नाद्यर्थनिर्देशो नियामकः। तस्यार्थानादेशनादिति भाष्यपर्यालोचनया आधुनिकत्वलाभात्।
नन्वस्तु क्रियावाचकत्वे सति गणपठितत्वं धातुत्वं क्रिया च धात्वर्थ एव न व्यापार इत्याशंकां समा
धत्ते॥ ॥धात्वर्थत्वं क्रियात्वं चेद्धातुत्वं च क्रियार्थता॥ अन्योन्यसंश्रयः स्पष्टस्तस्माद्स्तु यथा कर
म्॥१२॥ ॥यदि क्रियात्वं धात्वर्थत्वमेव तर्हि धातुत्वघटके तदर्थरूपक्रियात्वग्रहः
क्रियात्वग्रहे तदवच्छिन्नवाचकत्वघटितधातुत्वग्रह इत्यन्योन्याश्रय इति। यद्यपि पूरयित्वा
व्याख्येयम्। यथाश्रुते चान्योन्याश्रयस्योत्पत्तौ ग्रहे वा प्रतिबंधकत्वाभ्युपगमेनासंगत्यापत्तेः। न १२

चान्यतमत्वं धातुत्वं। भूवादय इत्यस्य वैयर्थ्यापत्तेरित्यत आह। अस्त्विति। व्यापारसंतानः क्रिया तद्वा
चकत्वे सति गणपठितत्वमित्यर्थः। ननु सनादीनां फलांशानन्यतमत्वेनाद्यपतद्वाचकत्वे सति ग
णपठितत्वं लक्षणमुच्यताम्॥ धात्वर्थत्वान्नेषां क्रियात्वेन व्यवहारो भाष्यादौ कृत्नोप्युपपत्स्यत
इति चेन्न। अन्यतमत्वेऽपि विकल्पस्यापि विकल्पपती। ति प्रयोगानुसारात्प्रवेशावश्यकत्वेन तदर्थ
केचेत्यस्यापेउक्तरीत्या गणपठितत्वसत्त्वेनातिव्याप्तेरिति। नन्वस्यैव धातुत्वे ऽस्त्वा स्यादौ क्रियाप्रती
त्यभावादस्त्यादीनां तद्वाचकानामधातुत्वप्रसंग इत्यत आह॥ ॥अस्त्यादावपि धर्मांशे भाव्येऽस्ति
वहिभावना॥ अन्यत्राशेषभावानुसानयानप्रकाशने॥१२॥ ॥अस्त्यादौ अस भुवि इत्यादौ धर्म्यं
शे धर्मिभागे भाव्येभाव्यत्वेन विवक्षिते। अस्त्येव मनौ पतत्येव॥ अयमर्थः॥ सत्त्वे गते न चेति प्रयो
महत्तायत्नेन निवृत्ती। ति प्रयोगे सत्तारूपफलानुकूलाभावनामतीयत एव उक्तं स्यादिचोपदेतुस्

ल.वै.भू.
१५

तरां शोहितो लोहितादासीदं पुत्रस्य सुतो भवन् इति दर्शनात्॥ किंच अत्र भावनाविरहे लडादिरनवस्थान
स्यात्। तस्या एव वर्तमानत्वादिविवक्षायां तद्विधानात्। क्रियाभेदाय कालस्तु संख्या सर्वस्य भेदिके इति
वाक्यपदीयादिति। नन्वेवमस्तु। यत्नस्य कर्तृकुतो न प्रतीयते इत्यत आह। आश्रयेति। अशेषभावात्।
भावनायाः फलसमानाधिकरणत्वात्। तथा च भावनायाः फलसामानाधिकरण्यं तदस्य एतैरो
पद्यतिभावः। नन्वेवं किं करोतीति प्रश्ने पचतीत्युत्तरस्येवास्तीत्युत्तरमपि स्यादिति चेदिष्टापत्तिः। आस
न्नविनाशं कंचिदुद्दिश्य किं करोतीति प्रश्ने ऽस्तीत्युत्तरस्य सर्वसंमतत्वात्। इतरथा तु सुस्थतया
निश्चिते किं करोतीति प्रश्नः पाकादिविशेषगोचर एवेत्यवधारणादस्तीति नोत्तरमिति। ननु भा
वनायाः फलनिष्ठत्वात् कृतावस्थायस्य कर्मत्वात् सर्वे धातवः क्रियावाचकत्वे सकर्मकतापत्तिरित्यत
आह॥ ॥फलव्यापारयोरेकनिष्ठतायामकर्मकः॥ धातुस्तयोर्धर्मिभेदे सकर्मक उदाहृतः॥१३॥ १५

25

एकनिष्ठतायां। एकमात्रनिष्ठतायां। भिन्नाधिकरणा इति यावत्। तेन गम्यादौ फलस्य कर्तृनिष्ठ
त्वेपि नातिव्याप्तिः। अकर्मकोपद्यादिः। तयोः फलव्यापारयोराश्रयभेदे सकर्मक इत्यर्थः। उक्तं च वा
क्यपदीये। आत्मानमात्मना बिभ्रदस्तीति व्यपदिश्यते। अंतर्भावाच्च तेनासौ कर्मणा न सकर्मक इति।
बिभ्रदिति। तेन तद्धारणानुकूलो व्यापारोप्यवगम्यते इति भावः॥ तेन कर्मणा सकर्मकत्वं तु न। अं
तर्भावात्। फलांशेन समानाधिकरणत्वादित्यर्थः। आत्मानं ज्ञानातीत्यत्र त्वादौ च द्वावात्मा
नौ। शरीरात्मा अंतरात्मा च। तत्रांतरात्मा तत्कर्म करोति येन शरीरात्मा सुखदुःखे अनुभवतीति
कर्मवत्कर्मणेति सूत्रीयभाष्योक्तरीत्या भिन्नाधिकरणनिष्ठतामादाय सकर्मकत्वमित्यवधेयम्॥
ननु सत्त्वभूतक्रियायां धात्वर्थत्वे पाकः इत्यत्रापि तत्त्वस्यापत्तिः। न चेष्टापत्तिः॥ कृदभिहितो भावो द्रव्य
वत्प्रकाशत इति भाष्यविरोधादित्यत आह॥ ॥आख्यातशब्दे भागाभ्यां साध्यसाधनवर्तिता॥ प्र

26

वै.भू. ल्पिता यथा शास्त्रे स घञादिष्वपि क्रमः॥२४॥ ॥आख्यातशब्दे पदप्रयोगे धात्वंतो यादृशो। भागाभ्यां धातुतिङ्-
१५ भ्यां प्रकृतिप्रत्ययभागाभ्यामिति विवरणकारोक्तमप्रयुक्तं। आख्याते प्रत्ययस्यापि भागद्वयसत्वात्।
साध्यसाधनरूपता यथाक्रमं शास्त्रे। साध्यत्वं क्रियांतराकांक्षानुत्थापकरूपवत्त्वं। साधनत्वं का-
रकत्वेनान्वयित्वं। स घञादिष्वपि। प्रकृत्यर्थः साध्यावस्थाः सत्त्वेन साधनावस्थारूपा इति शेषः। घञा-
द्युपस्थाप्यलिंगसंख्यान्वयिनी कारकान्वयिनी च। आख्याताना तथा नातु नैवं तथापि कारकत्वेनान्व-
यित्वमात्रेण दृष्टांतदार्ष्टांतिकत्वे स्वपेयम्। न च पचते धातुना तथाभिधानेनानाभावः। ओदनस्य
पाक इति कर्मषष्ठ्यापत्तेः। न च भवतीत्यत्र व्याहृतं तिङ् न क्रियान्वयात्षष्ठी। कर्तृकर्मणोः कृती-
ति कृद्योगेन योग एव तद्विधानात्। न लोकाव्ययनिष्ठाखलर्थतृनामिति लादेशयोगे षष्ठीनिषेधाच्च।
एवं रीत्या काष्ठैः पाक इत्यत्र तृतीयापि न। एवं कृदन्ते पि धातुना सत्त्वावस्थापन्न एवोच्यते। अत एव स्तो- १५

कं पचतीतिवत् स्तोकं पाक इत्यप्रयुक्तेः। एतदेव स्पष्टयति॥ ॥साध्यत्वेन क्रिया तत्र धातुरूपनिबंधना॥
सिद्धभावस्तु यस्तस्याः स घञादिनिबंधनः॥ २५॥ न च घञादिभिः सिद्धत्वेनाभिधानेऽपि नाभावः। पाक इ-
त्युक्ते भवतीति शेषे साकांक्षोत्थानस्यैव मानत्वात्। धातूपस्थाप्यस्य तदसंभवस्योक्तत्वात्। स्तोकः पाक इ-
त्यनापत्तेश्च। तस्मादाख्यातार्थान्वये स्तोकादिशब्देभ्यो द्वितीया। घञर्थान्वये प्रथमा पुंल्लिंगता चेति न तत्त्विड्-
येघञादेः शक्तिरूपेयम्॥ एतेन घञादीनां प्रयोगसाधुतामात्रमिति नैयायिकनव्योक्तमपास्तम्। न च घ-
ञंतशक्त्या पस्यापद्यान्वये स्तोकः पाक इति भवतीति वाच्यम्। घञंतानुपूर्व्याः शक्ततावच्छेदकत्वे गौरवा-
द्गुणासमानाश्च घञादेरेव तथात्वकल्पनादिति दिक्। एवं च घञ्शक्त्यभिप्रायेण हरभिहितमिति भा-
ष्यमतेनान्तर्हितोऽप्यर्थ इति भावः। ननु कारकाणां भावनान्वयनियमे एव पाकस्तण्डुलानामिति कर्मषष्ठ्यनुसारेण
भावनायां वाच्यत्वं सिध्येत्सा एव कुत इत्याशंकां समाधत्ते॥ ॥संबोधनांतं कृत्वोऽर्थाः कारकं प्रथमो व

वै.भू. नि:॥धातुसंबंधाधिकारनिष्पन्नमसमस्तनञः॥१८॥ ॥संबोधनांतस्यक्रियायामन्वयः।त्वंब्रूहिदेवदत्तेत्या
१९ दौनिपातानुरोधात्।समानवाक्येनिपातयुष्मदस्मदादेशा इत्यनेनसमानवाक्यएवतन्निषेधात्॥ उक्तंहि
वाक्यपदीये।संबोधनपदंयच्चतत्क्रियायाविशेषणम्॥ व्रजानिदेवदत्तेतिनिघातोत्रतथासति।ति॥
यच्चनिभवतिदेवदत्तेत्यादौयुष्मदस्मभाष्यादिरीत्यैकवाक्यतासत्त्वात्तस्यादेशनिघातः॥तिङ् तिङ इतिसूत्र
यतातिङंतानामप्येकवाक्यतास्वीकारात्॥एकतिङ्वाक्यमितिचरतांवार्तिककाराणांमतेपरंन।वस्तु
त:एकतिङ्विशेष्यकंवाक्यंइतितन्नभिमतायस्यहेतुराजीपादौवैयाकरणभूषणेस्माभिरुक्तमितिपरि
संज्ञा वा: त्यक्तानन्यमतेपिभवत्येवेत्यवधेयं।कर्तृत्वोर्थाइतिक्रियाभ्यावृत्तिगणनेकृत्वसुजितिक्रियायोगेतत्सा
धुत्वोक्तेः।क्रियायाअभ्यावृत्तिःपुनःपुनर्जन्मतस्मिन्द्योत्येइतितत्रार्थात्।कारकं।कारकेइत्यधिकृत्यते
षांसूत्राणांकारकशब्दोहिक्रियापरः।करोतिकर्तृकर्मादिव्यपदेशानितिव्युत्पत्तेः।तथाचान्वियेषु १९

पादानादिसंज्ञाविधिषुक्रियार्थककारकशब्दानुवृत्त्याक्रियान्वयिनामेवसंज्ञेतिभाष्येस्पष्टम्॥प्रथमो
वतिः।तेनतुल्यंक्रियाचेद्वतिरितिविहितः।तत्रयत्तुल्यंसाक्रियाचेदित्युक्तत्वात्।धातुसंबंधाधिकारः।धा
तुसंबंधेप्रत्ययाइत्यधिकृत्यतेषांविधानात्।असमस्तनञ्।समासोपोदः।प्रसज्यप्रतिषेधोयोनञ्निस
र्थः।उत्तरपदार्थान्वयेपिसमासविकल्पेनपक्षेसमस्तत्वात्प्रयाप्तुनग्रहणायोगात्।तत्रचासमस्तन
ञः।क्रियान्वयमानाभावः।नत्वंपचसितपुत्रांपचायचैत्रोनपचतिघटोनजायतेइत्यादौक्रियायाएव
निषेधप्रतीतेः।अतएवविद्यमानेपिपटेनयामयोगः।तथाचघटोनास्तीत्यत्राप्यस्तित्वाभावएवबोध्यते।
नहिघटोनजायतेनास्तीत्यत्रयोघटस्तत्संबंधेदमंतरेणास्तिविशेषः।तथाचभूतलेनघटइत्यत्राप्यस्तीत्यध्या
हार्यम्।अकारतासंबंधेननञर्थविशेष्यकबोधेधातुजन्यभावनोपस्थितेर्हेतुत्वस्यक्लृप्तत्वात्॥शेषंन
ञर्थनिर्णयेवक्ष्यते॥ ॥तथाषष्ठ्यस्यचभावेनषष्ठीचेत्सुदितंद्वयम्॥साधुत्वमष्टकस्यास्यक्रियायैवान्वयादर्थ

वै.भू. नाम्॥ ७॥ ॥यस्य च भावेन भावलक्षणमित्यत्र भावनार्थकभावशब्देन न प्रयोगे साधुत्वाख्यानसंभवात्प
१७ वीवाचारेरे इति तत्रत्रिसूत्रेपि च कारए यस्य च भावेनेत्याद्यानीत्यर्थः॥ साधुत्वमिति॥ तत्त्वरूपं तु यस्य
ते॥ क्रियायैवेति॥ अथ भावः॥ भूवादिसूत्रादिषु भावः क्रियाशब्देन भावनाव्यपदेशान्न तु तस्य सत्तेति
की शक्तिः॥ फलांशे काचित्कः क्रियते इति यौगिकः प्रयोगः॥ तथा च संज्ञाशब्दस्यानपेक्षप्रवृत्तत्वेन चत
वत्वात् भावनान्वय एव साधुतालाभ्यतेऽनत एव संज्ञाशब्दवाचस्यादृष्टत्वेन रक्षुतराण्यंश्यपठितकृत्स्नेन
वेयमानमुवेदेन तु न रूपमानकल्पितिनत्वमेनिर्णीतम्॥ किंच फलांशेपि भावनायां विशेषणम्।
कारकाण्यपि कृचित्तथाभूतानीति गुणानां च परार्थत्वादसंबंधः समत्वात्स्यादितिन्यायेन सर्वेषां च का
राजनि भावनायामेव परस्परनिरपेक्षाण्यन्वियंति॥ न हि भिक्षुको भिक्षुकांतरं याचितुमर्हति सत्यन्य
स्मिन्नपि भिक्षुके इतिन्यायेनापि फलं त्यक्त्वा भावनायामेवान्वियंतीति मीमांसका अपि मन्यंते। एवं च विशे १७

ष्यतपाकारकादिमकारकचोधं यति धातुजन्योपस्थितिर्हेतुरिति कार्यकारणभावस्य क्लृप्तत्वात्॥ यच्चापि
पा० न० फ पक्तापाकं करोत्यादौ भावनागुणभूतानन्वयापि क्लृप्तकार्यकारणभावानुरोधात् तस्यामेवान्वय इत्यवसीय
त इत्यादिषु पाणौ च यंति॥ केचित्तु भूतले घटः देवदत्तो घटमित्यादावन्वययोग्याकांक्षासन्निध्योरदर्शनादन्व
तत्व्यतिरेकेण साधुत्वलाभ इत्याहुः॥ तत्र समुपचयतिमाह॥ ॥यदि पक्षेपि चेत्त्वर्थः कारकं च नन्वादिषु॥
अन्वेति त्यज्यतां तर्हि चतुर्थ्याः स्वरहिकल्पना॥ ८॥ ॥पर्वतो वह्निमान् धूमान्महानसवत्॥ भूतलेन घटः
भूतले घट इत्यादिषु प्रवृत्तं एवमादिष्वनुशासनविरोधेपि यदि साधुत्वमन्वयव्याख्यायेयनेन हि चतुर्थ्याः स्व
फ हिकल्पनापि त्यज्यतामित्यर्थः॥ अनुशासनानुरोधेयतो त्वर्धजरतीयमयुक्तमिति भावः॥ एवं कर्त्रादौ विहि
तानामित्यादीनां क्रियायैवान्वय इत्याह॥ ॥अविग्रहा गतादिस्था यथा पाकादिकर्मभिः॥ क्रियायां च
ध्यनेन इत्यन पूर्व्यादिषु स्थिता॥ ९॥ ॥न विद्यते विग्रहणं यस्याः सा अविग्रहा गुणीभूतेति यावत्॥ न

वै.भू. याच्यामांगतत्वस्य तत्र यथा पाकप्रत्ययार्थगुणीभूताविक्लित्याद्यामादिकर्मभिः संबध्यते तेन पाकः न पूर्वो
१८ क्तस्मिंस्तत्रापि गुणभूतादन्यादिभिरित्यर्थः। न च तनिमात्रे समुदायशक्तेर्वक्ष्यमाणत्वात तां तर्ग
ताभावत्वात्पदार्थैकदेश इति कथं तत्रान्वय इति वाच्यम्॥ नित्यसापेक्षत्वे कदेशे पि देवदत्तस्य गुरु
कुलं चैत्रस्य न सेत्स्यादा विशान्वयाभ्युपगमात्। एवं भोक्तुं पाकः भुक्त्वा पाक इत्यत्रापि द्रष्टव्यम्॥ अतिप्र
संगमाशंक्य समाधत्ते॥ ॥ क्त्वातोर्थाः क्त्वातुमुन्त्व्यसुरिति चेत्तर्हि नि हि कृचितः। अतिप्रसंगो नोभयोः
भिधानस्य समाश्रयात्॥ २९॥ ॥ भोक्तुं पाकः भुक्त्वा पाक इत्यादौ तुमुन्क्त्वानौ क्रियायां क्रियार्थायां स
मानकर्तृकयोः पूर्वकाले इति क्रियावाचकोपपदे क्रिययोः पूर्वोत्तरकाले विधीयमाना अपि तुमुना
द्यो गुणभूतां तामादाय पाचयाजात्यं तेनयाकुत्वो र्था अपि स्युः॥ एकः पाक इत्यत्रैकस्य संख्या॥ द्वौ पा
कौ त्रयः पाका इत्यत्र द्वित्रिचतुर्भ्यः सुच्त्र्या पं चेत्यत्र कृत्वसुच् स्यात्। न पाचसत्कृत्वाः कः द्विः पाकः त्रिः १८

पाक इत्याद्यापत्तिरिति चेदिष्टापत्तिः॥ द्विर्वचनमित्यादिदर्शनात्। अतिप्रसंगस्त्वनभिधानान्नेत्याह॥
कौ अनीति॥ नहि द्विचत्वारिंशति परः प्रयुज्यते इत्यादावभियुक्तैरीत्यास माधेयमिति भावः। केचित्तु क्रियाभ्यावृत्ति
गणने इत्यत्र क्रियाग्रहणं व्यर्थम्। तस्या एवाभ्यावृत्तिसंभवेन सामर्थ्यात्तल्लाभात्। तया च साध्य
मात्रस्य भावक्रियात्वाभावान्न दिति वाच्यम्। न च पाक इत्यादौ तादृशी तिना नातिप्रसंगः। द्विर्वचनमि
तिवद्द्विः प्रयोगो द्विर्वचनमिति सुसत्या द्विर्वचने चीतिज्ञापकं चाभ्रिस्यो पपादनीयमित्याहुः॥ न
नु सिद्धान्ते बोधकत्वारूपाशक्तिरस्या तन्यहस्तत्वे पादावस्य प्रदर्शि इति धात्वोरेव भावेनावाच्यानां स्या
त्तस्येति कथं निर्णय इत्याशंक्य समाधत्ते॥ ॥ भेदाभेदकसंबंधोपाधिभेदनिबंधनं॥ साधुत्वं तदभा
वेपि बोधे नेह निवार्यते॥ ३०॥ ॥ भेदं विशेष्यं भेदकं विशेषणम्। तयोर्यः संबंध स्तस्य यो भेदस्तन्निबं
धनं साधुत्वम्॥ अयमर्थः॥ व्याकरणस्मृतिः शब्दसाधुत्वपरा॥ तत्रैवाव च्छेदकतया पाकत्वधर्मस्याश्र

वै·भू· किंत्वेवं वक्तृतां मीमांसकानां पुनः शक्तत्वे साधुत्वमित्येकमेवेति न द्वीत्याविचारे साधुत्वनिर्णय एव शक्ति
१९ निर्णय उच्यते। अतिरिक्तशक्तिवादे व्याख्यानानामसाधुताभावनायां स्फारे वा न यावच्चतुर्थ्यर्थे त
ती। प्रयोगवहात्तदर्थभावनायामाख्यातप्रयोगे प्राप्ते कर्मण्यसाधुशब्दप्रयोगान्न्यानन्तं वदेदिति नि
षेधोक्तेः प्रयत्नप्रयुक्तं प्रायश्चित्तं दर्शनान्तरीयं स्तुत्यतिप्रसक्तं स्यादिति। ननु तन्मते मान्न्दतं वदेदिति नि
षेधः क्रत्वर्थ एव न तु सिध्येत्। आख्यातेन कर्तुरुक्तत्वाच्चतुस्या पुरुषार्थते व स्यात्। प्रकरणाद्धि क्रत्व
र्थतानन्वश्रुतिविरोधेन बाध्यत इति चेन्न। तिङर्थस्तु विशेषणाश्रितत्वेनेन परिहृतत्वात्। न हि गुण
भूतः कर्ता निषेधं स्वांगत्वेन गृह्णातु मत्स्यभावनानुप्रधाने। तं प्रहीतुं समर्थेति प्रकरणाच्च क्रत्वर्थतै
व। अस्तु वा क्रतुयुक्तपुरुषधर्मः। अनुष्ठानेनविशेषाभावात्। जं जभ्य मानो नु भूषाम्नापि रसकान् इति
वाक्योक्तमें त्रविधिवदित्यादिभूषणेप्रपंचितम्। नन्वाख्यातस्य भावनायामसाधुत्वेन न स्तद्बोधेन १९

स्यात्। साधुत्वज्ञानस्य शाब्दबोधहेतुत्वादित्यत आह। बोध इति। असाधुत्वेविसाधुत्वभ्रमात् बोधोऽस्तु नाम
उपभ्रंश एव न तु। असाधुत्वं तु स्यादेवेति भावः॥ वस्तुतः साधुत्वज्ञानं न हेतुरन्वयव्यतिरेकनिर्णयो विनश्यति नेंप
रुद्धस्य साधुरनुमानेनेत्यलं विस्तरेण॥ ॥रंगोजिभट्टपुत्रेण कोण्डभट्टेन निर्मिते॥ भूषणसारे
स्मिन्धात्वाख्यातार्थनिर्णयः॥ ॥इति श्रीमहावैयाकरणभूषणसारे धात्वर्थाख्यात सामान्यार्थयोर्नि
रूपणं समाप्तम्॥ ॥अथ लकारविशेषाणामर्थं निरूपयति॥ ॥वर्तमाने परोक्षे श्वो भाविन्यर्थे भवि
ष्यति॥ विध्यादौ प्रार्थनादौ च क्रमाज्ज्ञेया लडादयः॥२२॥ ॥लडादय इतः षट् क्रमेणार्थेषु दर्शिताः॥
तथा हि। वर्तमाने लट् वर्तमाने लडिति सूत्रात् प्रारब्धापरिसमाप्तत्वं। भूतभविष्यद्भिन्नत्वं वा वर्तमान
त्वम्। पचतीत्यादावधिश्रयणादारभ्य पर्यन्तमध्येतरस्तोनिभवति लट्प्रयोगः। आस्ते तिष्ठति पर्वता इत्यं
तीत्यादौ नतु स्थालिकानां राज्ञां क्रियाया अनित्यत्वात् हि शिष्यस्योत्पत्त्यादिकमादाय वर्तमानत्वमूह्यम्॥

वै. भू.
२१ उक्तं च भाष्ये। इह तत्तत्कालिकत्वं क्रियापालिन्हनेरधिकरणमिति। परतो भिद्यते सर्वमात्मा तु न विक-
ल्प्यते। पर्वतादिस्थितिस्तस्मात्स्वरूपेण भिद्यत इति वाक्यपदीये। एवं च नम आसीत् तु स्रोतानपि दिनं
परास्तः। अहमेकः प्रथममासं वर्त्तामि च भविष्यामि चेत्यादिप्रयोगोपि योज्यः। तत्र वर्त्तमानत्वादि-
लादिभिर्योतने क्रियासामान्यवाचकस्य तद्विशेषलक्षणा परोलटादेस्तात्पर्यग्राहकत्वेनोपयोगात्।
अन्वयव्यतिरेकाभ्यां तद्रूपं लटादिवाच्यमेव। अन्यथा गम्यमानां वाचकत्वविरोधापत्तिरित्यपि प्रत्या-
ख्येयं। लिडर्थमाह। परोक्ष इति। परोक्षे लिडिति सूत्रात्। कालस्याद्यतनत्वानद्यतनत्वभेदेन द्वैविध्यात् द्वि-
धोपि भूतभविष्यद्रूपः। तत्रानद्यतने भूते परोक्षे लिडित्यर्थः। तेनाद्यतने भूते अनद्यतने भविष्यति भूते-
प्यपरोक्षे च न लिट्प्रयोगः। परोक्षत्वं च साक्षात्करोमीत्येतादृशविषयताशालिज्ञानाविषयत्वम्। न
च क्रियामात्रमेव यत्नेनापरिदृश्यत्वात् पूर्वापरीभूतावयवा न प्रत्यक्षा पिण्डीभूता निर्देष्टुमिति भाष्यात् २१

स्याऽत्रानौ दृश्यत्वेन परोक्षत्वव्यावर्तकमिति चेन्न। पिण्डीभूतायाः निर्देष्टुमशक्यत्वेपि अवयवशः
साक्षात्करोमीति प्रतीतिविषयत्वसंभवात्। अन्यथा पश्य मृगो धावतीत्यत्र तस्या दर्शनकर्मता न स्या-
त् इति मतिभाति।। व्यापाराविष्टानां क्रियानुकूलसाधनानामेवात्र परोक्षत्वं विवक्षितमतो नोक्तदोषः।
अत एव पचावेत्यादावनुरोधाद्व्यापाराविष्टानामित्यपि च इति। कथं तर्हि व्याते नेकिरणावलीमुदयन इति
त्वक्रियायाः स्वमस्यस्वत्वादिति चेत्। असंगतमेव। व्यासंगादिना स्वव्यापारस्य परोक्षत्वोपपादनेपि अ-
नद्यतनत्वानीतत्वयोरभावेन तदर्थकलिट्संभवात्। लुडर्थमाह। श्वोभाविनीति। अनद्यतने भाविनीत्य-
र्थः। अनद्यतने लुडिति सूत्रात्। यथा। श्वो भवितेत्यादौ। लृडर्थमाह। भविष्यतीति। भविष्यत्सामान्ये इत्य-
र्थः। लृट् शेषे चेति सूत्रात्। यथा परो भविष्यतीत्यादौ। तत्त्वं च वर्तमानप्रागभावप्रतियोगिसमयोत्पत्ति-
मत्त्वम्। लेडर्थमाह। विध्यादाविति। लिङर्थे लेडिति सूत्रात्। लिङर्थश्च विध्यादिरिति वक्ष्यते। लोडर्थमाह।

वै. भू. प्रार्थनेति॥ आदिना विध्याद्याशिषो ग्रहणं॥ आशिषि लिङ्लोटौ लोडिति सूत्राभ्यां तथावगमात्॰ प्रयोगस्तु
२१ ने शिवप्रसादद्रष्टारौ॥ एतयोरर्थो लिङः॥ एवं च प्रत्ययानां समानार्थत्वादिति तन्निर्णये भेदनिर्णयः॥ ल
ङादिक्रमेण ङितामर्थमाह॥ ॥ह्योभूते प्रेरणादौ च भूतमात्रे लुङादयः॥ तस्यां क्रियातिपत्तौ च भूते
भाविनि लृङ् स्मृतः॥ २३॥ ॥लङर्थमाह॥ ह्योभूत इति॥ अनद्यतने भूत इत्यर्थः॥ अनद्यतने लङिति सूत्रा
त्॥ यथास्य पुत्रोऽभवदित्यादि॥ लिङर्थमाह॥ प्रेरणादाविति॥ विधिनिमंत्रणामंत्रणाधीष्टसंप्रश्नप्रार्थ
नेषु लिङिति सूत्रात्॥ विधिः प्रेरणं॥ भृत्यादेर्निकृष्टस्य प्रवर्तनं॥ निमंत्रणं नियोगकरणम्॥ आवश्यके प्रे
रणेत्यर्थः॥ आमंत्रणं कामचारानुज्ञा॥ अधीष्टः सत्कारपूर्वको व्यापारः॥ एतच्चतुष्टयानुगतं प्रवर्त
नात्वेन वाच्यता॰ लाघवात्॥ उक्तं च॥ अस्ति प्रवर्तनारूपमनुस्यूतं चतुर्ष्वपि॥ तत्रैव लिङ्विधातव्यः
किं भेदस्य विवक्षया॥ इत्याद्यप्रसादनार्थं वा प्रपंचार्थमथापि वा॥ विध्यादीनामुपादानं चतुर्णामादितः २१

कृतमिति॥ प्रवर्तनात्वं च प्रवृत्तिजनकज्ञानविषयतावच्छेदकत्वं॥ तच्चेष्टसाधनत्वस्यास्तीति तदेव विध्य
र्थः॥ यद्यपि एतत्कृतिसाध्यत्वस्याप्यस्तीति तज्ज्ञानस्यापि प्रवर्तकत्वात्तथापि यागादौ सर्वप्रत्यक्षत
एवावगम्यत इत्यनन्यलभ्यत्वान्न तच्छक्यम्॥ बलवदनिष्टाननुबंधित्वज्ञानं च न हेतुः॥ द्वेषाभावेनान्यथा
सिद्धत्वात्॥ आस्तिकनास्तिकस्य नरकसाधनताज्ञाने नरकपामस्पृक्तरेद्द्यादेषाभावदशायां प्रवृत्तेर्व्य
भिचाराच्च तस्मादिष्टसाधनत्वमेव प्रवर्तना॥ उक्तं च मंडनमिश्रैः॥ पुंसां नेष्टाभ्युपायत्वात्क्रियास्वन्यः
प्रवर्तकः॥ प्रवृत्तिहेतुं धर्मं च प्रवदंति प्रवर्तनामिति॥ प्रपंचितं चैतद्दूषणभूषणे॥ आदिना हेतुहे
तुमतोर्लिङ्॰ आशिषि लिङ्लोटौ इति सूत्रोक्तहेतुहेतुमद्भावादयो ग्राह्याः॥ योग्यताद्यविनाभावगुरोरतो तेन
पातयेदिति प्रयोगः॥ लुङर्थमाह॥ भूतमात्रे इति॥ भूतसामान्य इत्यर्थः॥ भूते लुङिति सूत्रात्॥ अ
नद्यतनध्वंसप्रतियोगित्वं भूतत्वम्॥ न च क्रियायां निर्बाधमिति विद्यमानेऽपि घटेऽपरोऽभूदिति प्रयोगः॥

 विद्यमानध्वंसप्रतियोगीपराभिन्नाश्रयकउत्तरसाधनानुकूलोव्यापारइतिबोधः॥अथप्रत्ययसंग्रहः॥कालो
 द्विविधः अद्यतनोऽनद्यतनश्च॥आद्यस्त्रिविधः॥भूतभविष्यद्वर्तमानभेदात्॥अंत्योपिद्विविधः॥भूतोभ
विष्यंश्च॥तत्रवर्तमानेलट्॥भूतत्वमात्रेलुङ्॥भविष्यत्वमात्रेलृट्॥हेतुहेतुमद्भावाद्यपिकार्यविवक्षा
यामनद्यतनेलुङ्॥अनद्यतनेभूतत्वेनविवक्षितेलङ्॥तत्रैवपरोक्षत्वविवक्षायांलिट्॥तादृशेभविष्य
तिलुडितिद्वेष्यः॥लृङ्॰र्थमाह॥सत्यामिति॥क्रियायाअतिपत्तिरनिष्पत्तिः॥तस्यांगम्यमानायांभू
तेभविष्यतिहेतुहेतुमद्भावेसतिलृङ्॰स्यर्थः॥लिङ्निमित्तेलृङ्॰क्रियातिपत्तावितिसूत्रात्॥लिङोनिमित्तं
हेतुहेतुमद्भावादि॥यथासुवृष्टिश्चेदभविष्यत्तदासुभिक्षमभविष्यत्॥वह्निश्चेत्स्यात्तत्पक्ष्यत्ओदनम
पक्ष्यदित्यादौ॥अत्रचवह्न्यभिन्नाश्रयकप्रज्वलनानुकूलव्यापाराभावप्रयुक्तओदनाभिन्नाश्रयकवि
क्लित्त्यनुकूलव्यापाराभावइतिशाब्दबोधइति॥स्यादिकथ्यं॥अयंचार्थनिर्देशउपलक्षणं॥अर्थोत्तरेपि

चतुर्दशोविधानदर्शनात्॥प्रसिद्धत्वादेवचार्थेषुशक्तिः अन्यत्रलक्षणेतिमतांतररीत्याबोध्यं॥एतेषांक
र्मणियामकत्वात्तुबंधक्रमएव॥अतएवपंचमोलकारश्छन्दस्यनेनमीमांसकैर्लेड्व्यवहृयतइतिदिक्॥२२
॥ ॥इतिवैयाकरणभूषणसारेलकारविशेषार्थनिरूपणंसंपूर्णम्॥ ॥सुबर्थमाह॥ ॥आश्रयो
ऽवधिरुद्देश्यःसंबंधःशक्तिरेववा॥यथायथंविभक्त्यर्थाःसुपांकर्मेतिभाष्यतः॥२४॥ ॥द्वितीयातृतीया
सप्तमीनामाश्रयोऽर्थः॥तथाहि॥कर्मणिद्वितीया॥तत्रकर्तुरीप्सिततमं॥क्रियाजन्यफलाश्रयत्वस्वार्थः॥
क्रियाजन्यफलवत्त्वेनकर्मणएवकर्तुरीप्सिततमत्वात्॥तथायुक्तंचानीप्सितमित्यादिसंग्रहायैवमेव
युक्तं॥ईप्सितानीप्सितत्वादेःशाब्दबोधेभानाभावेनसंज्ञायामेवतदुपयोगेननुवाच्यकोटौतन्निवेशः॥
तथाचक्रियायाःफलस्यचधातुनैवलाभाद्धन्यलभ्यआश्रयएवार्थः॥तत्त्वंचाखंडशक्तिरूपमवच्छेद
कं॥ओदनंपचतीत्यत्रविक्लित्त्याश्रयत्वात्कर्मता॥घटंकरोतीत्यत्रोत्पत्त्याश्रयत्वात्॥उत्पत्तेर्धात्वर्थत्वात्

वै॰भू॰ ज्ञानातीत्यत्रावरणभंगरूपतात्पर्यफलाश्रयत्वात्। अतीतानागतादिपरोक्षस्थलेपितावानन्यस्यत
२३ स्यावरणरूपत्वात्। अन्यथा यथापूर्वं न जानामीत्यापत्तेः। अतीतादेराश्रयतानवच्छिन्नयत्नयाज्ञानाश्रयत
या नैयायिकानामिवसत्कार्यवादसिद्धान्तादोषपरत इति। उक्तं च। अतिरोभावाभ्युपगमे भावानां सैवना
स्तितानागतस्थकर्मेतिरोभावेनस्थितीतिवर्तीयत इति। ननु चैवं स्पन्दमंगच्छतीत्यत्र स्पन्दस्येव चैत्रस्या
२ पि क्रियाजन्यस्पन्दसंयोगरूपफलाश्रयत्वात्कर्तृतापत्तौ चैत्रश्चैत्रं गच्छतीत्यापत्तिः। न। यागतः काशीं
गच्छति चैत्रे ग्रामं गच्छतीत्यापत्तिश्च। क्रियाजन्यसंयोगस्य काश्यामिव विभागस्य ग्रामेपि सत्वादिति
चेन्न। ग्रामस्थेव चैत्रस्यापि फलाश्रयत्वेपि नरोपकृतसंततकर्मसंज्ञाया बाधेन चैत्रश्चैत्रमिति प्र
योगासंभवात्। द्वितीयोप्यनौचित्यात्। एवं नियामकत्वात्। अन्यथा गमयति कुसुमं गोकुलमित्यत्रैवप्र
यनिकुसुमेनेत्यत्रापि कुसुमपदात् द्वितीयापत्तिः। शाब्दबोधस्थैत्रस्यैत्रमित्यत्रस्यादिति चेन्न। तथाप्युक्तं २३

नामित्यापत्तेः। उच्यतां वा प्रकारतासंबंधेन द्वितीयार्थाश्रयप्रकारकधात्वर्थफलविशेष्यकबोधं प्रतिधा
त्वर्थव्यापारानधिकरणाश्रयोपस्थितिर्हेतुरिति कार्यकारणभावांतरं। प्रकृते चैत्रस्य व्यापारानधिक
रणत्वाभावान्न दोषः। प्रयागस्य कर्मत्वं तु संभावितमपि न। समभिव्याहृतधात्वर्थफलशालित्वस्यैव क्रि
याजन्यैत्वनेन विवक्षणस्योक्तप्रायत्वात्। नैयायिकास्तु द्वितीयोपचारणाय परसमवेतत्वं द्वितीयार्थो
पचारणाय धात्वर्थतावच्छेदकत्वं फले विशेषणं द्वितीयायाश्चाभित्तु पारदते। परसमवेतत्वं धात्वर्थक्रि
यायामन्वेति न तु वैश्वकार्यकारणभावांतरकल्पनात्। परत्वमपि द्वितीयायास्तत्प्रकृत्यर्थापेक्षयाबोध्यते।
तथा च चैत्रस्तंडुलं पचतीत्यादौ तंडुलान्यसमवेतव्यापारजन्यधात्वर्थतावच्छेदकविक्लित्तिशालित्वात्तंडु
लस्य कर्मता। शाब्दबोधस्तु तंडुलसमवेतधात्वर्थतावच्छेदकविक्लित्त्यनुकूलतंडुलान्यसमवेतक्रिया
जनकृतिमांश्चैत्र इत्याहुः। तन्न। ऐत्रयामहे। परसमवेतत्वादेर्गौरवेणावाच्यत्वात्। अतिप्रसंगः किं द्वि

वै.भू.सा.
२५

तीयायाः शाब्दबोधस्य वा। न घुः॥ नावद्या च्यकथनेपि तत्तादृशस्यात्। गमयति हरणं गोकुलमिति वृत्ता च पति
करणं गो परस्यापत्तेः। तंडुलं पचति चैत्र इति तंडुलं पचाते तस्य पमेवेत्यापत्तेश्च। विक्लित्त्यनुकूलतंडुलान्यस
मवेताग्निसंयोगरूपधात्वर्थान्वयित्वात्। शब्दबोधातिप्रसंगोप्युक्तरीत्यैव निरस्तः। परसमवेतत्वस्यधात्व
र्थेपि परत्वस्य परसमवेतत्वस्य चैत्रान्वयत्वाभावाने कशः कार्यकारणभावाभ्युपगमे गौरवान्नरत्वादितिस्प
ष्टं भूषणे। एतच्च समनियं। निर्वर्त्यं च विकार्यं च प्राप्यं चेति त्रिधा मतं। तच्चेप्सिततमं कर्म चतुर्धान्यत्तु कल्पि
तं। औदासीन्येन यत्प्राप्यं यच्च कर्तुरनीप्सितं। संज्ञांतरैरनाख्यातं यद्यच्चाप्यन्यपूर्वकमिति वाक्यपदीया
त्। परसत्त्वा यत्ने सह्या जन्मना यत्प्रकाशते। तन्निर्वर्त्यं विकार्यं तु द्वेधा कर्मव्यवस्थितं। प्रकृत्युच्छेदसंभू
तं किंचित्काष्ठादिभस्मवत्। किंचिद्गुणांतरोत्पत्त्या सुवर्णादिविकारवत्। क्रियाकृतविशेषाणां सिद्धिर्यत्र न
गम्यते। दर्शनादनुमानाद्वा तत्प्राप्यमिति कथ्यते इति चतन्नैवोक्तं। घटं करोतीत्यादौ। काष्ठं भस्म करोती २५

तिकुंडलं सुवर्णं करोतीति च द्वितीयं। घटं पश्यतीति तृतीयं। तृणं स्पृशतीत्युदासीनं। विषं भुंक्ते इति द्वेष्यं।
गां दोग्धीति संज्ञांतरैरनाख्यातं। क्रूरमभिक्रुध्यतीत्यन्यपूर्वकं। कर्तृत्वं तीयायां आश्रयोर्थः। न चाद्ये। स्वतं
त्रः कर्तेति स्वातंत्र्यं च धात्वर्थव्यापाराश्रयत्वं। धातुनोक्तक्रिये नित्यं कारके कर्तृतेष्यत इति वाक्यपदी
यात्। अत एव यदा यदीयो व्यापारो धातुनाभिधीयते तदा स कर्तेति। स्थाली पचति अग्निः पचति एधाः
पचंतीति तंडुलः पच्यते स्वयमेवेत्यादि संगच्छते। अत एवं कर्मकर्तृव्यपदेशाच्चेति सूत्रे मनोमयः प्राणश
रीर इति वाक्यस्य मनोमयस्य जीवत्वे वाक्यशेषे तस्य एतमितः प्रेत्याभिसंभवितास्मीति प्राप्तिकर्मत्व
कर्तृत्वव्यपदेशो विरुद्ध इति भगवता व्यासेन निर्णीतं कथं संगच्छतां। उच्यते। जीवस्यैव तत्तेयत्वे प्राप्तिक
र्मत्वमपि वाच्यं। कर्तृत्वं च तस्याख्यातेनोक्तं। न चैकस्यैकदा संज्ञाद्वयं युक्तं। कर्तृसंज्ञया कर्मसंज्ञाया बा
धात्। तथा चैतमिति द्वितीया न स्यात्। कर्मकर्तृतायां च यगाद्यापत्तिरिति शब्दविरोधद्वारा भवतीति भेदे

व्यापारानुकूलो ४

वै. भू. २५ तुः। एवं च व्यापारांशस्य धातुलभ्यत्वादाश्रयमात्रं तत्त्वार्थः॥ कारकं च क्रमयोक्तत्वं तत्त्वाश्रयत्वं वा रंडः
करोतीत्यत्र व्याख्यानं। अयं चाविनिगमः। मुख्यः यत्र न को हेतुः। कर्मकर्तृव्यापारो हरिः सेव्यते कार्यते हरिणा
गमयति कृष्णं गोकुलं। मदभिन्नाश्रयको हरिकर्मकसेवनानुकूलो व्यापारः। हर्यभिन्नाश्रयक उत्पादना
नुकूलो व्यापारः। गोकुलकर्मकगमनानुकूलकृष्णाश्रयकं व्यापार इति यथाक्रमं बोधः॥ करण तृतीयार्था
स्त्वाश्रयव्यापारौ वाच्यौ॥ तथाहि। साधकतमं करणं। तमबर्थः प्रकर्षः। स चाव्यवधानेन फलजनकव्या
पारवत्ता। तादृशव्यापारवत्कारणं च करणं। उक्तं च वाक्यपदीये। क्रियायाः परिनिष्पत्तिर्यद्व्यापारादनंत
रं। विवक्ष्यते यदा यत्र करणं तत्तदा स्मृतं। वस्तुतस्तदनिर्देश्यं न हि वस्तु व्यवस्थितं। स्थाल्या पच्यत इत्येषा वि
वक्षा दृश्यते यत इति। विवक्ष्यत इत्यनेन सहकारिवैकल्ये तदभावाद्द्वितीयासमभ्याहारे रवैकाश्यं सूचयति। न
चैवं कर्तॄणामन्यथासिद्धत्वादित्युत्तरमीमांसाधिकरणे शक्तिविपर्ययादिति सूत्रेणांतःकरणस्य कर्तृत्वे कर २५

णत्वशक्तिविपर्ययापत्तिरुक्तानुपपद्येतेति वाच्यं। नरैरेवांशानां चौचित्तानेन विवक्षानभ्यासादावेति मुखंनरे करणानया
त्तूमस्य कर्तृत्वं प्रकृत्य शक्तिविपर्ययापत्तिर्निष्प्रमाणा कल्प्येतेत्यभिप्रायात्॥ वस्तुतस्तु स्वभावमात्र
पेनेति निपातान्तरसोऽभयपदेऽप्यधिकरणे भाष्ये एतस्य दृष्टिस्त्यादिप्रपंचितं भूषणे। सप्तम्यास्त्वाश्रयो
र्थः। सप्तम्यधिकरणे चेत्यधिकरणे सप्तमी। तत्राधारोऽधिकरणमिति सूत्रादाधारः। न चाश्रयत्वं तत्राश्र
योऽर्थः शक्यः। तत्समवच्छेदकं। न चाश्रयत्वमात्रेण कर्तृकर्मकरणानामाधारसंज्ञा स्यात्। स्यादेव यदि
ताभिरस्यानवकाशः स्यात्। तेनैवमपि सांकर्यमेव स्यादिति वाच्यं। निरूपकभेदेन भेदात्। फलनिरूपिता
धारो द्वितीयार्थः। व्यापारनिरूपितस्तु तृतीयार्थः। कर्तृकर्मद्वारा व्यापारफलनिरूपितः सप्तम्यर्थः। कार
क इत्यधिकृत्य विहितत्वात्सप्तम्याः क्रियाश्रयत्वे लब्धे स्येव पर्यवसानात्परंपरया व्याप्यत्वं च कर्तृकर्मद्वारा तदाश्रयत्व
मस्त्येव स्थाल्यादेर्भूतलकटादेश्चेति स्थाल्यां पचति भूतले स्थितिः कटे शेते इत्याद्युपपद्यते। उक्तं च वा

वै॰ भू॰ स्य वरीये।कर्तृकर्मव्यवहितानामसाक्षात्स्वक्रियां प्रत्युपकुर्वत्क्रियासिद्धौ साक्षात्त्वेऽपि करणं स्मृतं।एतच्च
२६ त्रिविधं।औपश्लेषिकं वैषयिकमभिव्यापकं चाकटे शेते गुरौ वसति मोक्षे इच्छास्ति तिलेषु तैलमिति
एतच्च संहितायामिति सूत्रे भाष्ये स्पष्टं।अवधिः पंचम्यर्थः।अपादाने पंचमी।तच्च ध्रुवमपायेऽपादानमि
तिसूत्रात्।अपायो विश्लेषस्तज्जनकक्रियानाश्रयीभूतमपादानमित्यर्थः कारकमपि भूतमिति भावः॥
उक्तं च वाक्यपदीये।अपाये यदुदासीनं चलं वा यदि वाचलं।ध्रुवमेवातदावेशात्तदपादानमुच्यते।पत
तो ध्रुव एवाश्वो यस्मादश्वात्पतत्यसौ।तस्याप्यश्वस्य पतने कुड्यादि ध्रुवमिष्यते।उभावप्यध्रुवौ मेषौ
यद्यप्युभयकर्मजे।विभागे प्रविभक्ते तु क्रिये तत्र व्यवस्थिते।मेषान्तरक्रियापेक्षमवधित्वं पृथक्पृथ
क्।मेषयोः स्वक्रियापेक्षं कर्तृत्वं च पृथक्पृथक्॥५॥ अस्यार्थः।अपाये विश्लेषहेतुक्रियायामुदासी
नमनाश्रयः अतदावेशात्तत्क्रियानाश्रयत्वात्।एवं च विश्लेषहेतुक्रियानाश्रयत्वे सति विश्लेषाश्र २६

५२

यत्वं फलितम्।वृक्षात्पर्णं पततीत्यत्र पर्णस्य पतनद्वारेणापायसत्त्वं तं।धावतोऽश्वात्पततीत्यत्राश्वस्य क्रियाश्र
यत्वाद्विश्लेषहेतुत्वेति।कुड्यात्पततोऽश्वात्पततीत्यत्राश्वस्य विश्लेषजनकक्रियाश्रयत्वेऽपि तन्न विरुद्ध
मित्याह।यस्मादश्वादिति।तद्विश्लेषहेतुक्रियानाश्रयत्वे सतीति विशेषणोपमिति भावः।एवमश्व
निष्ठक्रियानाश्रयत्वात्कुड्यादेरपि ध्रुवत्वमित्याह।तस्याप्यश्वेति।उभयकर्मजविभागस्थले विभाग
स्यैकत्वात्तद्विश्लेषजनकक्रियानाश्रयत्वाभावात्परस्परस्मान्मेषावपसरत इति न स्यादित्याशंकम
माधत्ते।उभावपीति।मेषान्तरेति।यथा निश्चलमेषादपसरद्द्वितीयमेषस्थले निश्चलमेषस्यापसरन्मे
षमादाय ध्रुवत्वं तथा चापि विभागैक्येऽपि क्रियाभेदादेकक्रियामादायापरस्य ध्रुवत्वमिति।तथा च विश्ले
षाश्रयत्वे सति तज्जनकतत्क्रियायाअनाश्रयत्वं क्रियायामपादानत्वं वाच्यं।क्रिया चात्र धात्वर्थो
ऽनुसंधेयः।तेन वृक्षकर्मजविभागवति वृक्षाद्वृक्षं पततीति संगच्छते।वस्तुतो नैतावता वृक्षं चम्पावाच्यमिति

५३

वै.भू. त्वचपेर्लक्षणमाचंहिलीयार्थोकरीत्यामप्रयोगानिप्रसंगस्यासंभवेनवाच्यकोटौप्रवेशस्यगौरवेणासंभ
२७ वादितितुप्रतिभाति। नचैवमपिवृक्षात्स्यंदतेइतिनस्यादितिवाच्यं। आसन्नानुसिलोदस्याचतिनदृतिना
दिदृक्षानात्। एतेनपंचमीजन्यापादानत्वबोधेसकर्मकधातुजन्योपस्थितेर्हेतुत्वमितिसमाधानाभासो
प्यपास्तः। नचैवमपिवृक्षात्स्यजनीतिदुर्वारं। कर्मसंज्ञयाःपादानसंज्ञाबाधेनपंचम्यसंभवात्। अ
मात्रनेनयाप्रयोगेपदेवोधाभावेनुभवसिद्धत्वाद्धिं पंचमीजन्यापादानत्वबोधेस्वन्यादिभिन्नधा
तुजन्यबुद्धेर्हेतुत्वंवाच्यं। बलाहकादिद्योततद्वारौनिःसरत्यल्पाहार्यै। रूपंरसात्स्पर्शगिस्वत्रबु
द्धिपरिकल्पितमपादानत्वंदृष्टव्यं। दृष्णिनेतिपंचमीवा। इदंचनिर्दिष्टविषयंकिंचिदुपात्तविषयंत
था। अपेक्षितक्रियंचेतित्रिधापादानमुच्यतइतिवाक्यपदीयोक्तेस्त्रिविधं। यत्रसाक्षाद्धातुनागतिर्निर्दि
ष्टस्तेननिर्दिष्टविषयं। यथाश्वात्पततीति। यत्रधात्वंतरार्थांगेस्वार्थंधातुराहतदुपात्तविषयं। यथाबला २७

५८

हकाद्विद्योततेनिःसरणांगेविद्योतनेधातुर्निर्वर्तते। अपेक्षितक्रियंपचनदृश्यं। यथाकुतोभवान्पाटलिपु
त्रात्। अत्रागमनमर्थमध्याहृत्यान्वयःकार्यः। इदंरूपकंतुर्यर्थःनयाहि। संप्रदानेचतुर्थी॥ तच्चक
र्मणायमभिप्रैतिससंप्रदानमितिसूत्रात्कर्मणाकरणभूतेनयमभिप्रैतिईप्सतितत्कारकंसंप्रदानमि
हि त्यर्थकाद्दुरेरूपः। इदमेवंशैथिल्यं। तदुरेरूपकेत्याविषयत्वंचरणेपत्तमित्येवपूर्वतंत्रेनिरूपितं। अत
एवमासनवन्मेत्रावरुणायदंडंप्रदानमित्यधिकरणेचौ। तेसोमेमैत्रावरुणायदंडंप्रयच्छतीतिवि
हितंदंडदानेनप्रतिपत्तिःकिंतुचतुर्थीश्रुत्याऽर्थकर्मेतितत्त्वनिर्णीतं। रजकायवस्त्रंददातीत्यपिरवं
दिकोपाध्यायःशिष्यायचपेटांददातीतिभाष्योदाहरणादिष्टमेव। वृत्तिकारास्तुसम्यक्प्रदीयतेयस्मै
तत्संप्रदानमित्यन्वर्थसंज्ञाश्रयणात्तुनिष्टनिपर्यंतमर्थंवर्णयंतोरजकस्यवस्त्रमित्येवाहुः। इदंचानि
राकरणात्कर्तुमुरगांगेकर्मणेप्सितं। प्रेरणानुमतिभ्यांचलभनेसंप्रदानतामितिवाक्यपदीयात्त्रिविधं।

५५

वै. भू. सूर्यायार्घ्यं ददातीत्यादौ। नात्र सूर्यः प्रार्थयते नानुमन्यते न निराकरोति। प्रेरकं। विप्राय गां ददाति। अनुम
२९ न्तृ। उपाध्यायाय गां ददाति। अत्र सर्वत्र प्रकृतिप्रत्ययार्थयोरभेदः संसर्गः। विभक्तौ नाम्नां धर्मिवाचकत्वा
द्दुर्गमन्वयावाचकत्वे कर्मणि द्वितीयेति सूत्रस्य रसभंगापत्तेः। कर्मार्थकत्वं तद्धितादौ तथा दर्शनाच्च। द्विती
यार्थकत्वं तु नामार्थकर्तृत्वं तस्मै पार्श्ववाचकत्वाल्लाभाच्च। सुपां कर्मादयोप्यर्थाः संख्या चैव तथा ति
ङामिति भाष्याच्चेति दिक्। आख्यातस्यापि प्रकृत्यैव लाभान्न विभक्तिवाच्यता। किं त्वाख्यातलभ्यं वाच्यं त
द्वा देव चतुर्थ्येनावच्छेदकं। करणत्वनीयाग्रव्यापारोपि। पंचम्या विभागमात्रं। चतुर्थ्या उद्देश्यत्वमात्रं। अनए
वाक्रुद्धापि करणमपि न विरुध्यत इत्यपि प्रेत्याहुः। शक्तिरेवेति। षष्ठ्यामपीति शेषः। शेषे षष्ठीति सूत्र
मस्याः संबन्धमात्रं वाच्यं। कारकषष्ठ्यास्तु शक्तिरेवेत्युक्तं। सप्तमीपंचम्यौ कारकमध्य इति सूत्रेण किंः का
रकमिति निपातस्य भाष्ये दर्शनात्। एवं चाद्देवदत्तस्य गौ ग्रामस्य गायते हाद्गां पांह स्वेन मपारी। यतः स्वत्र रे २९

तत्र

५६

वरतसंबंधिनी या गौस्तद्भिन्नाग्र यक स्वागमनुकूलो व्यापारणोरे श्पको गेहनिष्ठविभागजनकोगं गाधिक
रणको हल्लकरणकोमन्नि स्तोव्यापार इति बोधः। यथायथं उक्तप्रकारेण। अत्र मानमुपदर्शयन्नपरं ना
नार्नी स्यादौ द्वितीया पाणिविधयता पाल दाणेनि वहु कुर्ल चरतो नैयायिकादीन्प्रत्याह सुपां कर्मेतीति। अ
यंभावः। सुपां कर्मादयोप्यर्थाः संख्या चैव तथा तिङां। प्रसिद्धो नियमस्तत्र नियमः प्रकृतेषु वेतिवार्तिक
तद्भाष्याभ्यां कर्मादेर्वाच्यता यास्तन्नियमस्य च लाभः। तथा हि। औपगवः समीप। कर्मणि द्वितीया याद्येकवोर्द्वि
वचनैकवचनइत्यादेः स्वस्य निमस्ति। नाप्येकवचनं द्विवचनादेरेकवाचनया कर्मादेलिलसंख्या याश्च वा
च्यता लभ्यते। तथा तन्नियमश्च द्वितीयो लभ्यते। द्वितीया कर्मण्येव। तृतीया करणे एवेत्येवमादिरर्थनिय
मः कर्मणि द्वितीयैव करणे तृतीयैवेत्येवं शब्दनियमश्च। उभयथापि सिद्धनियमविरुद्धं लक्षणादिकमसा
धुत्वप्रयोजकमिति द्वितीया ते कर्मणि नान्यत्र चरेदिति निषेधविधयो भवतोस्ये नि सोद्धृ या लक्षणापि विभक्तावत्र

५७

वै॰भू॰ योजिकैव। अत एव विभक्तौ लक्षणेत्यादिनैयायिकग्रहाणां व्यवहार इति दिक्॥२४॥ ॥इति वैयाकरण
२९ भूषणसारे सुबर्थनिर्णयः समाप्तः॥ ॥नामार्थमाह॥ ॥एकं द्विकं त्रिकं चाथ चतुष्कं पंचकं तथा॥ नामार्था इ त्रिकं
ति सर्वेमी पक्षाः शास्त्रे निरूपिताः॥२५॥ एकं जातिः। लाघवेन तस्या एव वाच्यत्वौचित्यात्. अनेकव्य
क्तीनां वाच्यत्वे गौरवात्। न च व्यक्तीनामपि प्रत्येकमेकत्वाद्विनिगमनाविरहः। एवं ह्येकस्या एव व्यक्तौ
एकत्वाभ्युपगमे व्यक्त्यंतरे लक्षणायां तत्समवेतान्यत्वं संसर्ग इति गौरवं। जात्यानुसहान्यत्वमेव संस
र्ग इति लाघवं। किंचैवं विशिष्टवाच्यत्वमपेक्ष्य नागृहीतविशेषणन्यायाज्जातिरेव वाच्येति युक्तं। व्यक्ति
श्चोपलक्षणं वा। एवं च न तत्र विभक्त्यर्थान्वयोऽप्युपपद्यत इति दिक्। यद्वा केवलव्यक्तिरेव एकः शब्दार्थः।
केवलव्यक्तिपक्षे एवान्यग्रहणस्यैकस्यैव स्वीकारंभेण तस्यापि शास्त्रसिद्धत्वात्। युक्तं चैतत्। व्यवहारे
णव्यक्तावेव तद्ग्रहणात्। संबंधितावच्छेदकस्य जातेरैक्याद्व्यक्तिरप्येकैवेति न गौरवमपि। न चैवं पर २९

त्वमपि वाच्यं स्यात्. एकत्वेनावच्छेदकत्वात्. तथा च नागृहीतविशेषणन्यायान्न देव वाच्यमस्त्विति वाच्यं। अका
रणत्वेपि कारणतावच्छेदकत्ववद्द्रव्यत्वेपि तस्यानावच्छेदकत्ववत्तथात्वापि संभवात्। अतं च भानेसे
विद्विभावानामेकं हि लोपलक्षणं। शब्दः सुकरसंबंधो न व्यभिचरिष्यतीति। वस्तुतस्तु न ह्याकृतिप
दार्थस्य द्वयं न परार्थ इति भाष्याद्विशिष्टं वाच्यं। एकमित्यस्य चायमभिप्रायः शक्तिज्ञाने विषयतयाऽव
वै॰ च्छेदिका जातिरेव। तथा च परत्वविशिष्टबोधे परत्वांशेऽन्याः प्रकारकपरत्वशक्तिज्ञानत्वेन हेतुनेतिका
र्यकारणभाव इत्यादि भूषणे प्रपंचितं न देनदभिप्रेत्याह। द्विकमिति। जातिव्यक्ती इत्यर्थः। त्रिकमिति। जा
तिव्यक्तिलिंगानीत्यर्थः। सत्त्वरजस्तमोगुणानां साम्यावस्था नपुंसकत्वं। आधिक्यं पुंस्त्वं। अपचयः स्त्री
त्वं। तत उच्यते निर्दिष्टं तदाख्यं चानमेव विरुद्धधर्मैरारोपितं शब्दाभियंते। केषांचिदनेकलिंगत्वव्यवहा
रस्तु समानानुपूर्वीकत्वेन शब्दानामभेदारोपात्। एवं च पदार्थपदे पुंस्त्वमेव व्यक्तिपदे स्त्रीत्वमेव। वस्तु

परेणनपुंसकत्वमेवेतिसर्वत्रैवायंपर्यायार्थः इयंव्यक्तिः इदंवस्त्विति व्यवहारस्तदर्शनादितरमितिचोपपद्यते।
१० नव्यक्तिगमर्थपरिच्छेदकत्वेनान्वेतीतियस्मादिशब्दोक्तंयत्तुस्त्रियांनाम्नीतियत्तुनेत्यादिविधिनैव्य
त्यादीनांग्रहणेनमप्रयोजयतीतिविभावनीयं।नव्यक्त्यादिशब्दोक्तलिंगस्येवयस्मादिशब्दोक्तलिंगस्या
पिसाधारण्यंरोक्तं।व्यक्तिशब्दस्यनित्यस्त्रीलिंगत्वेनतथासंभवेपियत्तुशब्दस्यनित्यपुल्लिंगत्वेप्रमा
णाभावात्।यस्मानतापुंगुहाचरंनेइत्यादिवेदेदर्शनाच्च।मीमांसायांचतुर्थेयत्तुनापजेतेत्यत्रैकत्वे
पुंस्त्वयोर्विवक्षितत्वान्नामेकपशुभिःयत्तुस्त्रियावापागइतिप्रतिपादितत्वाच्च।वस्तुतस्तुविशेष
विध्यभावेउभयपांनानांपुंस्त्वस्यव्याकरणेनिर्णीतत्वात्वेदभाष्येपिजलादिषुछंदसिवाचवनमि
तिमाभावाभावइत्युक्तेः यत्तुशब्दस्यनित्यपुंस्त्वनिर्णयात्प्रकृतेछागोवामंत्रवर्णादितिन्यायेनेचनि
र्णयः।मंत्रवर्णेहिछागस्यवपायामेदसइतिश्रूयते।तत्रछागस्येतिछागमामतंभावितमितिभवतितत १०

६०

नःपुंस्त्वनिर्णयइतिविस्तरेणप्रपंचितंभूषणे।चतुष्कं।संख्यासहितंत्रिकमित्यर्थः।पंचकं।कारकसहितं
चतुष्कमित्यर्थः।नत्वन्वयव्यतिरेकाभ्यांप्रत्ययस्येवनह्यचेनतएवलिंगादीनामुपस्थितेःप्रकृतिवा
च्यत्वमानाभावाच्चेतिचेत्सत्यं।प्रत्ययवर्जितेदधिपश्येत्यादौप्रत्ययमजानतोपिबोधात्प्रकृतेरेववा
चकत्वंकल्प्यनेलिंगानुशासनस्यप्रकृतेरेवदर्शनाच्चेति।अतएवैषुपदेषुननिर्बंधः।प्रत्ययस्यैववा
चकतायायुक्तत्वात्।द्योतिकावाचिकावास्तुर्हिलादीनांविभक्तयइतिवाक्यपदीयेपिपरसद्भयस्यसु
स्पादनात्।शास्त्रेइतिपदद्वयस्यशेषुसुत्वादनंव्यंजयितुंप्राधान्येनसरूपसूत्रादौव्यक्तं।रू॥शब्दस्ता
वच्छाद्बोधेभासते।तस्मोत्तिप्रत्ययोलोकेयःशब्दानुगमादने।अनुमितिमिवज्ञानंसर्वंशब्देनभासतइ
त्याद्युक्तेभक्तिकोक्तेः।विस्तुपुरुषारपेक्षादावर्थोच्चारणासंभवेनविनाशब्दविषयंशाब्दबोधासंगतिरित्येवेति
सोपिप्रातिपदिकार्थः।नचलक्षणयानिर्वाहः।निरूढलक्षणायाःशक्त्यनतिरेकात्।जवगडदशमुच्च।

६१

रयेत्यादौ एकवाक्यताग्रहेण एकार्थसंबंधरूपलक्षणाया अप्यहात्त्वा। अतानापाशब्दतेरनुपयोगात्। गंगामु
३९ च्चारयेत्यादिभाषाशब्दानामनुकरणेसाधुतासंपत्तयेतेषांशक्यभावेनपदत्वेलक्षणायाअसंभवा
च्चेत्यभिप्रेत्यशब्दोपिप्रातिपदिकार्थइत्याह। शब्दोपियदिभेदेनविवक्षास्यात्तदातथा। नोचेच्छ्रो
त्रादिभिःसिद्धोप्यसावर्थोनभासते॥२९॥ ॥यद्यनुकार्यानुकरणयोर्भेदविवक्षातदाशब्दोपिप्रातिप
दिकार्थः। यदितुभेदविवक्षातदाश्रोत्रादिभिरुपस्थितोप्यर्थोनभासते। अपिर्हेतौ। उपस्थितत्वाद्भास
तेइत्यर्थः। अयंभावः। अनुकार्यानुकरणयोर्भेदेनुकार्यस्यपदार्थतयानुपस्थितत्वान्नत्तिद्वयेशक्तित्वे
या। अभेदेप्रत्यक्षेविषयस्यहेतुत्वात्स्वप्रत्यक्षस्वरूपोपरजन्योपस्थितिमादायशब्दबोधविषयतोप
पत्तिरिति। यद्यप्यतिप्रसंगवारणायवृत्तिजन्यपदार्थोपस्थितिरेवहेतुस्तथाप्युच्चारणपतयावृत्तिम
त्त्वस्यसत्त्वान्नानुपपत्तिः। निरूपकतासंबंधेनान्यतरसंबंधेनवृत्तिमतएवशब्दबोधविषयत्वंकल्प्यते ३९

६२

इत्यनवद्यं। संबंधस्योभयनिरूप्यत्वात्पदार्थस्येवतद्बोधकत्वेनतस्यापिज्ञानसंभवाच्चेति। उक्तंचवाक्य
पदीये। ग्राह्यत्वंग्राहकत्वंचद्वेशक्तीतेजसोयथा। तथैवसर्वशब्दानामेतेपृथगवस्थितेइति। विषयत्वम
नादृत्यशब्दैर्नार्थःप्रकाश्यतइतिच॥३०॥प्रसंगादनुकार्यानुकरणयोरभेदपक्षेसाधकमाह॥ अत ए
वगवित्याहभूसत्तायामितीदृशं। नप्रातिपदिकंनापिपदंसाधुतुतत्स्मृतं॥३१॥ गवित्ययमाहभूस
त्तायामित्यादयोयेनुकरणशब्दाअनुकार्यान्नभिद्यंतेअतस्तेषामर्थवत्त्वाभावादर्थवदधातुरि
त्यप्रवृत्तेर्नपदत्वंनापिप्रातिपदिकत्वं। अथचसाधुत्वमुपपद्यते। अन्यथाप्रत्ययःपरश्चअपदं
नप्रयुंजीतेतिनिषेधात्तदसंपत्तावसाधुतापत्तिरित्यर्थः॥३२॥ ॥इतिश्रीमद्रंगोजिभट्टात्मजकौंड
भट्टकृतेवैयाकरणभूषणसारेनामार्थनिर्णयःसमाप्तः॥ ॥समासादिविभजनं॥ सुपांसुपातिङा
नाम्नाधातुनाथतिङांतिङा। सुबंतेनेतिविज्ञेयःसमासःषड्विधोबुधैः॥३३॥ सुपांसुपापरहृयमपिसु

६३

यंतं। राजपुरुष इत्यादिस्तु पंनिङ्। पूर्वपदं सुबंतमुत्तरं निङंतं। पर्यभूषयत् अनुव्यचलत् गतिमतो दात्त
३२ वता निङापि समास इति वार्त्तिकात्समासः। सुपोनाम्नाकुंभकार इत्यादि। उपपदमतिङ् इति समासः।
तत्र गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेरिति परिभाषया भवति सुबुत्पत्तेः
प्राक्। अन्यो नरपदे सुबुत्पत्तेः प्रागित्यर्थात्। अन्यथा चर्मक्री। तीत्यादौ न स्यो पानापत्तेः। सुपा धातु
ना। उत्तरपदं धातुमात्रं न सुब्निङंतम्। करभूः। आपनस्तुः क्विब्विधि प्रच्छ्यायतस्तु कटप्रुः जूर्भ्रीणां
दीर्घोऽसंप्रसारणं चेति वार्त्तिकात्। तिङां तिङा। पिबत खादत नायच्चत भञ्जत इत्यादिः। आख्यातमा
ख्यातेन क्रियासातत्ये इति मयूरव्यंसकादित्वात्। निङां सुबंतेन। पूर्वपदं तिङंतमुत्तरपदं सु
बंतं। जहिस्तंबः। जहिकर्मणा बहुलमाभीक्ष्ण्ये कर्तारं चाभिदधाति। निमयूरव्यंसकादित्वात्। गणसूत्रात्।
अयं च द्विधोपि समासस्तु पेसूत्रयोगविभागेन भाष्येसुत्रादितः। स्पष्ट। शब्दकौस्तुभादौ।। २८।। स्वयं भाष्या ३२

वार्त्तिके निपातनादित्यर्थः

६४

दिसिद्धं तद्देरं स्वासाय प्राचीनवैयाकरणोक्तविभागस्यापास्याविभिः सत्क्षणस्य प्रायिकत्वं दर्शयति।।
समासस्तु चतुर्द्धेति प्रायोवादस्तथा परः।। येयं पूर्वपदार्थादिप्राधान्यविधयः सच।। योन पूर्वोक्तोपिरे
तो गवचाद्विरास्थितः।। २९।। चतुर्द्धा। अव्ययीभाव तत्पुरुष बहुव्रीहि द्वंद्वभेदात्। अयं प्रायोवादः। भूतपू
र्वः। इभ्यः। क्वारएभूः। आपनस्तुः। वागर्थाविवेत्यादिसंग्रहात्। तथा पूर्वपदार्थप्रधानोऽव्ययीभावः। उत्त
रपदार्थप्रधानस्तत्पुरुषः। उभयपदार्थप्रधानो द्वंद्वः। अन्यपदार्थप्रधानो बहुव्रीहिरित्यादिलक्षणमप
प्रायिकं। उन्मत्तगंगं। सूपप्रति। अर्द्धपिप्पली। द्विचाः। शशकुशपलाशमित्यादौ परस्परव्यभिचारात्।
तथाहि। उन्मत्तगंगमित्यव्ययीभावे पूर्वपदार्थप्राधान्याभावादव्याप्तिः। अन्यपदार्थप्राधान्याद्बहुव्रीहिल
क्षणातिव्याप्तिश्च। अन्यपदार्थे च संज्ञायामिति समासात्। सूपप्रतीत्यव्ययीभावे उत्तरपदार्थप्राधान्यात्तत्पु
रुषलक्षणातिव्याप्तिरव्ययीभावाव्याप्तिश्च। सुप्प्रतिना मात्रार्थे इति समासः। अर्द्धपिप्पलीति तत्पुरुषे पूर्वप

६५

दार्थप्राधान्यादव्ययीभावादिष्वव्याप्तिरुक्तपुरुषस्य व्याप्तिरत आह। अर्द्धं नपुंसकमिति समासात्। एवं पूर्वकायः इत्या
३३ दौ द्रष्टव्यं। द्विगावति बहुव्रीहावुभयपदार्थप्राधान्याद्द्वन्द्वे च बहुव्रीहौ व्याप्तिरत आह। शशकुशपला
शमित्यादि। द्वन्द्वे समाहारान्यपदार्थप्राधान्याद्बहुव्रीहौ त्वनिव्याप्तिर्द्वन्द्वे व्याप्तिरस्यादित्यभावः। सिद्धा
न्तेनु अव्ययीभावाधिकारवर्त्तित्वमव्ययीभावत्वमित्यादि द्रष्टव्यम्। असंभवश्चैषामित्याह॥ भीतप्र
वृत्त्यादिरिति तत्र चपारिविग्रहाङ्गूलादेर्व्यस्त पञ्चलक्षणलक्षिते पाममपि न समासलक्षण
त्वं चोपपन्नानुनद्दे इत्यादिनिभावः॥ २९॥ ननु पूर्वपरार्थप्राधान्यादि समासे सुवचं तथाहि। समर्थः
पदविधिरिति सूत्रे भाष्यकारैरनेकधोक्तेषु पक्षेषु जहत्स्वार्थाजहत्स्वार्थपक्षयोरेवैकार्थीभाव
अपेक्षारूपयोः पर्यवसानं लभ्यते। न चाजहत्स्वार्थपक्षे उक्तव्यवस्थानासंभवेनि। तत्र शङ्कां मनसि कृ
त्वाह॥ ॥ जहत्स्वार्था जहत्स्वार्थे द्वे वृत्ती ते पुनस्त्रिधा॥ भेदः संसर्ग उभयं चेति वाच्यव्यवस्थितेः॥ ३०॥ ३३

जहति पदानि स्वार्थं यस्यां सा जहत्स्वार्था। पदे वर्णहृतौ पदानामानर्थक्यमिति स्वार्थः। अयं भावः समासएकै
वराजविशिष्टपुरुषभानसंभवेन राजपुरुषपदयोरपि पुनरलक्ष्यो पृथक्त्वं कल्प्यं। उपमयाचकादिपदे पुरु
षादिपदानामिव। अन्यथा राजपदेन विना हवाक्ये च राज्ञः स्वातन्त्र्येणोपस्थितिस्तथाद्ध्ययं राज्ञः पुरु
षः स्यत्रेव ऋद्धस्य राजपुरुष इत्यस्याप्यापत्तेरिति। अजहदिति। न जहति पदानि स्वार्थं यस्यां साऽजह
त्स्वार्था। अयमभिप्रायः। राजपुरुषादिसमासादौ नानिरिक्ता शक्तिः। कल्प्यकाभावात्। क्रमराजादिपदादे
र्थोपस्थितिसंभवेन तत्कल्पनस्य गौरवपराहतत्वाच्च। ऋद्धस्य शक्तिस्त्वागोप्यशाब्दिकैः कल्प्येत। नथा च
कोशादिवशात् कुमराजे चविशिष्टार्थबोधः। अयमेव चापेक्षापक्षो मतान्तरे तेन भाष्यकारैरुक्तः। नत्
त्र पनेसमासे ऋद्धस्येति विशेषणान्वयापत्तिः। सविशेषणानां वृत्तिर्न वृत्तस्य वा विशेषणयोगो नेति नि
र्निक्तात्। तथा चैतन्मतवादिनां पूर्वो नरपदार्थसत्वात्पूर्वपदार्थप्रधानत्वादि व्यवस्थासूपपादेति भावः।

प्रसंगाद्इति भेदस्यापि निरूपयति। नन्विति। द्वेअपि तयोर्विशिष्टे॥ वाच्यत्वे विभ्यात् वाच्यमेवाह। भेदद्वस्यादि।
 भेदः अन्योन्याभावः। तथा च राजपुरुषस्याराजपुरुषादिभिन्नत्वमिति बोधः। अस्य वाच्यत्वे च राजपुरुषः सुं
दर इतिवद्राजपुरुषो देवदत्तस्य चेत्यपि स्यात्। वाच्यत्वे च न द्विरोधान्नैवं प्रयोग इति भावः। राजसंबंध
वानित्येव राजभिन्नभेदस्तु उत्तरकालमुपतिष्ठत इत्याशयेनाह। संसर्ग इति। विनिगमनाविरहं अस्वामि
केपि राजपुरुषादिप्रयोगापत्तिं च मनसि कृत्वा भयं बाध्यमित्याह। उभयं चेति। तथा च राजभि
न्नो राजसंबंधवान्स्वामी पुरुष इति बोधः॥ ३०॥ अपेक्षावादस्यैवं युक्तिभाष्यविरुद्धत्वात्तन्मूलकः पू
र्वपरार्थप्रधानत्वायुक्तः सर्गोप्ययुक्तः॥ किंतु एकार्थीभावपक्ष एवोत्सर्गोपि परं परस्यैव बोधकत्वाशयेन
समाधत्ते॥ ॥समासे खलु भिन्नैव शक्तिः पंकजशब्दवत्। बहूनां वृत्तिधर्माणां वचनैरेव साधने॥ स्या
न्महद्गौरवं तस्मादेकार्थीभाव आश्रितः॥ ३१॥ ॥समास इति। वृत्तिमात्रोपलक्षणं। समर्थः पदवि

रित्यत्र च पदसंबन्धियो विधिः यत्र समासादिः स तु समर्थः। विग्रहवाक्यार्थाभिधाने शक्तः सन्साधुरिति सूत्रा
र्थस्य भाष्यारूढत्वात्। परोऽस्य कृतिविधित्वं च वृत्तिः इति समासैकशेषसनाद्यन्तधातुरूपासु पंचस्वपि
इति वृत्तस्वेव। राजपुरुषादी कर्तृणां अपेक्षावादिनां मते रूपगं शक्तिसाधकमेवेत्याशयेनाह। पंकजशब्द
वदिति। पंकजनिकर्तुरवियोगादेवोपस्थितौ न चापि समुदायशक्तिर्न सिध्येत्। न च पद्मत्वरूपेणो
पस्थितियेन तत्कल्पनमिति वाच्यं। चित्रग्वादिपदेपि स्वामित्वेनोपस्थितियेन तत्कल्पनावश्यकत्वात्। लक्ष
णयैव तथोपस्थितिरिति चेत् पंकजपदेपि सा सुवचा। एवं रथकारपदेपि। तथा च वर्षासु रथकारोऽग्निमाद
धीतेत्यत्रापि विनालक्षणां रूढं प्रयोगे न ब्राह्मणादिविषयत्वोपपत्तौ न तत्कल्पनीयत्वाज्जातिविशेषस्या
धिकारित्वं भक्त्या पूर्वविद्याकल्पनमसंयुक्तं स्यादिति भावः। साधकांतरमाह। बहूनामिति। वृत्तेर्धर्मा वि
शेषण लिंगसंख्यायोगादयः लोपांशच वचनैः साधने गौरवमित्यर्थः। अयं भावः। विशिष्ट एकपत्नीकारे राज्ञः

पुरुषद्रुत्वेनैव राजपुरुषद्रुस्याविस्याद्विशेषणाद्यन्वयः। राजपदेन स्वत्वं नोपस्थितिसत्वात्। विभाषावच
३९ नं च समासनियमवारणाय कार्यं। ननु सविशेषणानामिति वचनान्न विशेषणाद्यन्वयः। विभाषावचनं च
स्वनमेवेत्यादरं कां समाधत्ते। वचनैरैवेति। न्यायसिद्धमेव सूत्रं। व्यपेक्षाविवक्षायां व्यासस्यैव कार्याभावे स
मासस्येति। स्वभावत एव प्रयोगनियमसंभवात्। सविशेषणेत्यपि विशिष्ट एकैकोशतः पदार्थैकदेश
तथा: न्वयासंभवान्न्यायसिद्धमिति भावः। अत एव व्यपेक्षापक्षस्तु हा इत्यर्थे तस्मिन्व्यपेक्षायां समा
सार्थ्यैपोसावेव कार्याभावस्तु नो विशेषः सचतत् स्वरूनि भाष्यकारेण दूषणमयुक्तं॥ ३९॥ तथा पचत्वादि
दैनिकौ यांचित्तौरथ्यो एतपदे गुरुधानाः केशचूडः सुवर्णालंकारो हिरेण्यः सप्तपर्णदृश्यादाचितनरेनरथ्यो
गादिक्यांनपुत्र पूर्णमिष्यसंपातविकारस्तु भ्रूस्यच लोपवीप्सायांयो वा वनिकोवाच्य इत्यनिर्गोरवंस्या
दितिदूषणांतरमाह॥ ॥चकारादिनिषेधोथ बहुव्रुस्यतिभंजनं। कर्त्तव्यं तेन्यायसिद्धंत्वस्माकं न दितिस्थि ३९

तिः॥४०॥ ॥आदित्याद्यन्तरूपाम्पः हंसगमनेत्यादावित्यादीनां पूर्वोक्तानां च संग्रहः। दूषणांतरमाह। बहुव्रुस
तिभंजनमिति॥ अयमाशयः। चित्रगुरित्यत्र स्वाम्यादिप्रतीतिरनुभवसिद्धा। न चेतत्र लक्षणा। ग्रामोद
कोग्राम इत्यादौ तदसंभवात्। प्राप्तिकर्त्रभिन्नमुदकमित्यादिबोधोनरंतत्संबंधपिग्रामलक्षणायामप्यु
दककर्तृकप्राप्तिकर्मग्राम इत्यर्थालाभात्। प्राप्तेति क्तप्रत्ययस्यैव कर्त्रर्थकस्य कर्मणि लक्षणेति चेन्न
हि समानाधिकरणप्राप्तिपदार्थयोरभेदान्वयस्तुल्यत्वेनोदकाभिन्नप्राप्तिकर्मेति स्यात्। अन्यपदास
मानाधिकरणप्राप्तिपदार्थयोरभेदान्वयव्युत्पत्तिभंगापत्तेः। ग्रामेधात्वर्थतयाकर्तृतासंबंधेनभेदे
नोदकस्य तत्रान्वयासंभवाच्च। अन्यथा देवदत्तः पच्यत इत्यत्र कर्तृतासंबंधेन देवदत्तस्यान्वयसंभवेनान
न्वयानापत्तेः। अथोदकाभिन्नकर्तृका प्राप्तिरिति बोधोनरंतत्संबंधपिग्रामोस्य न इति चेन्न ग्रामे धा
त्वर्थतया कार्यकर्तरि विशेष्यताया असंभवात्। प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थप्राधान्यमिति व्युत्पत्तेः।

मात्रपदे मानेर्विशेष्यत्वेनस्याएवतनामार्थत्वेनोदकेनसममभेदान्वयापत्तेश्च। एवमूढरथः उपहृतपशुः
३६ उद्धृतौदनावटुक्रपालिकेत्यादावपिद्रष्टव्यं। अत्रद्वितीयकर्मककवहनकर्ता। पशुकर्मकोपहरणोद्देश्यः ओ
दनकर्मकोद्धरणावधिः। वटुपाककर्माधिकरणमितिबोधाभ्युपगमात्। अतिरिक्तवृत्तिपक्षेचपरत्व
विशिष्टघटपदस्येवोदककर्तृकमानिकर्मत्वविशिष्टेमात्रोदकदृश्यादिसमुदायशक्त्यैवनिर्वाहइति
भावः॥ ३५॥ साधकांतरमाह॥ ॥अन्यस्यार्थेबहुव्रीहौ सुप्तस्यंतरकल्पना॥ त्वन्मतस्यागस्त्यास्तित्वन
लिंगशक्तिकल्पनेः॥ ३६॥ ॥अयंभावः॥ चित्रगुरित्यादिषुचित्रगोस्वाम्यादिप्रतीतिर्नचित्रशक्तिरुप
पद्यते। नचतत्रलक्षणा॥ साहिनचित्रपदे। चित्रस्वामी गौरितिबोधापत्तेः। नापिगोपदे। गोस्वामीचित्रइ
त्यन्वयबोधापत्तेः। ~~[illegible]~~ चित्रादिमात्रस्यलक्ष्यैकदेशत्वेनतत्र
गवादेरन्वयायोगात्। नचचित्राभिन्नागौरितिशक्त्युपस्थापस्यापयोरन्वयबोधोत्तरंतादृशगोस्वामीणापदेन ३६

62

तस्यतद्वृत्तिवाच्यं। गोपदस्यचित्रपदस्यवाविनिगमनाविरहेणलक्षकत्वासंभवात्। नचगोपदेसाक्षात्सं
बंधएवविनिगमकइतिवाच्यं। एवमपिमात्रोदकः इत्यादिसमस्तपदस्यार्थेबहुव्रीहौविनिगमकाभावेः।
यौगिकानांकर्त्राद्यर्थकत्वपासाक्षात्संबंधाविशेषात्। नचपरदवेलक्षणेतिनैयायिकोक्तंयुक्तं। बोधा
वृत्तिप्रसंगात्। नचपरस्परंतात्पर्यग्राहकत्वादेकस्यैवलक्षणालक्षणानद्वयोरितिनचोभावनिरिरितिवा
च्यं। एवमपिविनिगमनाविरहनादवस्थ्यं लक्षणायाअसंभवात्। नचचरमपदएवसामस्त्यार्थाच
पानुरोधात्। मस्ययानांसन्निहितपदार्थगतस्वार्थबोधकत्वसुत्वनेतिवाच्यं। एवंहिबहुव्रीहिसंभवा
पत्तेः। अनेकमन्यपदार्थइत्यनेनानेकसुबंतानामन्यपदार्थत्वमितिपारकत्वेनद्विधानात्। किंचएवंस
तिप्रादिपदेष्वपिचरमवर्णेएववाचकत्वाकल्पनास्यात्। पूर्वपूर्ववर्णानांतात्पर्यग्राहकत्वेनोपप
गसंभवात्। एवंसतिचरमवर्णमात्रस्यवर्णेर्थबोधापत्तिरितिचेदत्राप्युदकपदमात्रस्यवर्णारार्थस्य

63

स्यपापत्तिस्तु स्येत्यन्यत्र विस्तरः॥ एवं चायमर्थ बहुव्रीहौ तु लक्षणत्वं नरकल्पना। उक्तयुक्तेः अगसा शक्तं
३७ नरकल्पना। कृतत्यागः। कृतशक्त्यापपत्तिरिति तु लक्षि त्यागश्च तवालिलिंसर्वत्र समासे शक्तिं न
कल्पयेदिति वाक्यार्थः। यत्तु व्यपेक्षावादिनोन्ये याज्ञिकमीमांसकादयः तन्न समासे शक्तिः। राजपुरुष इ
त्यादौ राजपदादेः संबंधिलक्षणयैव राजसंबंध्यभिन्नः पुरुष इति बोधोपपत्तेः। अत एव राज्ञः पदा
र्थैकदेशत्वात् तत्र शोभनस्येत्यादि विशेषणान्वयः। न चापत्न एप्राप्नोति वृत्तौ यां चित्रगौ रथ इत्यादावि
वादिप्रयोगापत्तिः। अकार्थेन पारस्त्रक्तां नादिपरप्रयोगासंभवात्। न च विभाषेति सूत्रावयवस्य कल्पे। तत्र
णपाकानसंबंध्यभिन्नः पुरुष इति बोधोपपत्तेः। अत एव राज्ञः पदार्थैकदेशत्वात्तत्र शोभनस्येत्यादि वि
शेषणान्वयः। न चापत्न एप्राप्नोति वृत्तौ यां चित्रगौ रथ इत्यादि विशेषणान्वययोगापत्तिः। अकार्थेन पारस्त्रक्तां नादि
दृष्टेभ्यः संभवात्। अन्य विभाषेति सूत्रावयवस्य कल्पे लक्षणया राजसंबंध्यभिन्न इति बोधे विषयाभावसमा ३७

तस्या राजसंबंधयत्तिनिबुद्धोऽपि पायां विभक्त्यस्येत्यादि प्रयोगनियमसंभवात्। नापि चं कजपर इति चे
दीशक्तिसाधिका। न चापयप च शक्तिमज्ञानतोऽपि बोधात्। न च शक्यत्वग्रहे लक्षणयाने भ्योपि विशिष्टार्थप्र
त्ययः संभवति। अत एव राजादिपदशक्यग्रहे राजपुरुषमित्र चगुरित्यादौ न बोधः। नापि चित्रगुरि
त्यादौ लक्षणासंभवेऽप्ययमर्थ बहुव्रीहौ लक्षणापाज संभवः बहुव्रीहुत्पत्तिभंजनापत्तेरिति वाच्यं।
प्राप्तोदक इत्यादावुदकपदे एव लक्षणास्वीकारात्। पूर्वपदस्य यौगिकत्वेन तत्र लक्षणापायातु प
स्यपनदर्थज्ञानसाध्यतयाविलंबितत्वात्। तस्य पानासन्निहितपदार्थेण तस्यार्थबोधकत्वस्य
स्वस्यतुरोधात्। परादिपदे चातिरिक्तशक्तिः कल्प्यमाना विशिष्टकल्प्यते। विशिष्टस्यैव संकेतितत्वा
त्। बोधकत्वस्याविशेषेकं वर्णे चसत्वात्। मङ्कृते चास्वंतसन्निधानेन प्रत्ययार्थान्वयसौलभ्यापे
नरपदे एव सा कल्प्यन इति विशेषः। स्वीकृतं च परादिपदे चपि चरमवर्णस्यैव वाचकत्वं मीमांसकंम

न्यैरित्याहुः॥ अथोच्यते॥ समासे एतत्स्वीकारे न तस्य प्रातिपदिकसंज्ञादिकं न स्यात्। अर्थवत्त्वाभावे
१९ नार्थवदधातुरप्रत्ययः प्रातिपदिकमित्यस्याप्रवृत्तेः। न च कृत्तद्धितसमासाश्चेत्यनेन समासग्रहणा
त्सा। तस्य नियमार्थताया भाष्यसिद्धत्वात्। वैयाकरणभूषणस्पष्टे प्रतिपादितत्वात्। समासवाक्ये
एकैयभावेन शक्यसंबंधरूपलक्षणाया अप्यसंभवेन लाक्षणिकार्थवत्त्वस्याप्यसंभवात्। अथ
तिलतण्डुलादिस्थलारभ्य द्योः सुपिति निषेधस्थहारे भाष्यसिद्धेः। तथाराचाः तिष्ठाति प्रातिपदिकमित्येव सू
त्र्यतां। कृत्तमर्थवदादिसूत्रद्वयेन। समासग्रहणं च नियमार्थमस्तु। तथा चाविशिष्टं तदभिन्नं प्रातिप
दिकमित्यर्थात्समासस्यापि समासत्वादिति चेत्तथापि प्रत्येकं वर्णेषु संज्ञावारणायार्थवत्त्वावश्यकत्वे
न समासाख्यातितारवश्यमेवा। तथा च प्रातिपदिकसंज्ञारूपं कार्यमेवार्थवत्त्वमनुमापयति। धूमवद्वह्नि इवव
म्। किंचैवं चित्रगुमानयेत्यादौ कर्मत्वाद्यनन्वयापत्तिः। मत्पक्षे तु प्रकृत्यर्थान्वितस्वार्थबोधकत्वस्तु १९

स्तेः। विशिष्टेतरमेव मत्पक्षे सन्ते विशिष्टस्यैव प्रकृतित्वात्। परं तु सन्निहितपदार्थगतस्वार्थबोधकत्वम्तु
स्वातिरेककल्प्यं न त्विति। तन्मायुपकुंभं अर्द्धपिप्पलीत्यादौ पूर्वपदार्थे विभक्त्यर्थान्वयेन व्यभिचारात्। न
च तत्रापि सन्निधानमेवानुशासनिकसन्निधेर्विवक्षितत्वात्। तथा च परस्परोत्तरं यानुशिष्टासान
रेर्थगतं स्वार्थं बोधयति। समासे च समस्यमानपदोत्तरमेवानुशासनमिति वाच्यं। अर्थवत्सूत्रेण
विशिष्टस्यैव प्रातिपदिकत्वेन विशिष्टोत्तरमेव विभक्त्यनुशासनात्। अथ प्रकृतित्वाच्चेद्विभक्त्यर्था
न्वयद्रूपैव कल्प्यतामिति चेन्नहि पंकजमानयेत्यादिने पदमूलिनं पूजयेत्यादौ पंकजदंडमूलेयानय
नदर्शनपूजनादेरन्वयप्रसंगात्। अपरमानयेत्यत्र परे घ्यानयनान्वयापत्तेश्च। न च दंडादीनां वि
शेषणतया न त्वानयनादान्वयः। पाककर्त्री स्वः। पर्मास्तु स्वीत्यादौ पाकधर्मादिजन्यता या तत्रारूपत्
त्वादावनन्वयप्रसंगात्। तत्र प्रकृत्यर्थत्वं तन्नन्यस्त्वा न विषयत्वमात्रेण चाप्यविरुद्धमिति। तन्नापरे प

एवं सत्र घटपदात्समवायेनोपस्थिताकाशे चारणापत्तेस्त्यामरुस्यर्थस्यावच्छेदकत्वात्। अथ समसपदार्थ
१९ निंपदजन्योपस्थितिविशेष्यत्वं शक्त्यर्थत्वमिति चेन्न। गामानयतिरूपमोदंडेनेत्यत्र कृत्येतन्नीयार्था
न्वयप्रसंगात्। अथ समस्यमानपदार्थगतकार्यं अपार्थबोधकत्वं समासोत्तरविभक्तेः कल्प्यत इ
ति चेन्न। अव्यक्तनकल्पनोक्तम युक्तमित्यागें चापेक्षसमुदायशक्तिकल्पनस्यैव युक्तत्वादिति दिक्।
अपि च समासे विशिष्टशक्त्यस्वीकारे राजपुरुषमन्वित्र गुर्नीलोत्पलमित्यादौ सर्वत्रानन्वयप्रसंगः।
राजपदादेः संबंधिलक्षणायामपि तंदुलः पचतीत्यादौ कर्मत्वादिसंसर्गेण तंदुलादेः पाकान्वयवार
णाय प्रातिपदिकार्थप्रकारकबोधं प्रति विभक्तिजन्योपस्थितेर्हेतुताया आवश्यकत्वात्पुरुषादेस्तया
त्वाभावात्। तंदुलः शुभ इत्यादौ च प्रातिपदिकार्थप्रकारकप्रथमार्थे तंदुलादेरुत्तस्य चस्तु के भेदेनैवान्वयः।
शुभेण तंदुलेनेत्यादौ च विशेषणविभक्तिरभेदार्था। पार्ष्णिकोवान्वय इति नातिप्रसंगः। तथा च समा १९

५८

से परस्परमन्वयासंभवाद्राजविशिष्टे च समुदायस्यैतादृशे विशिष्टार्थे शक्तिः। किंच। राजपुरुषइत्यादेः
संबंधिनि संबंधे वा लक्षणा। नाद्यः। राज्ञः पुरुष इति [illegible] विवरणविरोधात्। समाससमानार्थकत्वा
कस्यैव विग्रहत्वात्। अन्यथा तस्माच्छक्तिनिर्णयो न स्यात्। नांत्यः। राजसंबंधरूपः पुरुष इति बो
धप्रसंगात्। विरुद्धविभक्तिरहितप्रातिपदिकार्थयोरभेदान्वयव्युत्पत्तेरित्यादि प्रपंचितं वैयाकरण
भूषणे। अत एव चत्वपद्धतुः प्रथमभक्ष इत्यत्र न भक्षमुद्दिश्यमापम्य विधानं युक्तं एकप्रसरताभंगा
पत्तेरिति तत्त्वा। ये। प्रथमेः स्विष्टकृतं यजतीत्यत्र चोणानुवादेन न त्रित्वविधानं युक्तं एकप्रसरताभंगाप
त्तेरिति दर्शमेच निरूपितं संगच्छते। संगच्छते चारुणाधिकरणारंभः। अन्यथाऽरुणयापिंगाक्ष्यैक
हायन्या सोमं क्रीणातीत्यत्रारुणपदवद्धितरयोरप्येकत्वादिगुणमात्रवाचकतया पूर्वन्त्वा क्रीणा
तीकरणत्वासंभवस्य तुल्यत्वादारुण्यस्यैव वाक्याद्वेद्यशंकापा असंभवादिति प्रपंचितं भूषणे। तस्मा

[illegible]कैरित / वी एवक्का / [illegible]नेच दास / [illegible] / [illegible] / गुरुवे[illegible]

६

५९

त्समासशक्तिपक्षोजैमिनीयैरवश्याभ्युपेयइत्याशंक्यनिरस्यति॥३३॥राजपुरुषइत्यादौराजा चासौपुरु
४० षश्चेत्येवविग्रहः।चित्रगुरित्यादौचचित्राणांगवामयमित्येव।समानार्थत्वानुरोधात्।यद्यपि
अष्टपर्णीनानामेवबहुव्रीहिरितिशेषोबहुव्रीहिरिंसूचाद्यभ्युपगम्यतइतिश्रमणांतेपक्षेचाकंचित्रा
गावोयस्येत्येवंसंभवत्येवषष्ठीतिसमासविधानाद्राज्ञःपुरुषइतिचपक्षेचाकंतथापितस्यन
विग्रहत्वंभिन्नार्थत्वात्किंतुकस्येचेतिमीमांसकाः।तान्प्रसंगान्निरस्यति॥ ॥आख्यातंतद्धितकृ
तोर्यत्किंचिदुपदर्शकम्।गुणप्रधानभावाद्यैस्तत्रदृष्टोविपर्ययः॥३४॥ ॥तद्धितकृतोर्यत्किंचि
दर्थबोधकंविवरणमाख्यातंतत्रविपर्ययोदृष्टः।तथाहि।आस्तिकःकुंभकारइत्यत्रास्तिकरणक
व्यापाराश्रयः।कुंभानुकूलव्यापाराश्रयइतिबोधः।अस्तेर्दीव्यतिकुंभंकरोतीत्यत्रास्तिकरणिकारे
वर्तमानकर्तृकादेवनानुकूलाभावनाकुंभोत्पत्त्यनुकूलाभावनेतिबोधः।कृत्स्वप्येकारकाणामा ४०

ख्यानेभावनायाःप्राधान्यंवदतोमीमांसकस्यापिइतिगुणप्रधानभावोव्यत्यासोनविवरणत्वबा
धकइतिनात्रपास्तिकस्यचित्रागावोयस्येत्यादेर्विग्रहत्वेबाधकमस्तीतिभावः॥३५॥ननुतत्करी
त्यासर्वत्रसमासेशक्तिःअस्तुचनयात्रिविग्रहत्वंपिपर्यानत्सरूपकर्मधारयपोःशक्तिमत्वाविशेषा
न्निषादस्थपत्यधिकरणसिद्धांतसिद्धिर्नस्यादित्यतआह॥ ॥पर्यवस्यच्छब्दबोधाविदूरमारु
ह्यणस्थिते।शक्तिमहैतरंगत्वबहिरंगत्वचिंतनम्॥३६॥ ॥पर्यवस्यंश्चासौशाब्दबोधश्चतस्माद
विदूरस्थासौमारुरुक्षणश्च।तदांगीतनस्थपत्यधिकरणाविरोधइत्यर्थः।अयमर्थः।निषाद
स्थपतिपदंसमासशक्तिपक्षेनिषादरूपेनिषादानांचस्थपतौनिषादस्वामिकेपुरुषांतरेचेत्येवं
सर्वत्रशक्तत्वान्नानार्थं।तथाचनानार्थतास्यपरिहृतेशापवर्गनिरितिन्यायेनतत्करूपमायांपरद्वयेन
पूर्वोपस्थितार्थएवोपस्थित्यादिलाघवात्तत्कल्प्यनइति।परेषामपिसनितात्पर्यपर्यग्रहःप्रवेशयेनितत्त्ल

ष्णा पादुर्वारत्वात्तात्पर्यमेव कल्प्यकोराववशिष्यत इति दिक्॥३७॥ ॥इति श्रीवैयाकरणभूषणसा
भू॰ रे समासशक्तिनिरूपणं समाप्तम्॥ ॥शक्तिप्रसंगात्तस्याःस्वरूपमाह॥ ॥इंद्रियाणां स्वविषयेष्व
नादिर्योग्यता यथा॥ अनादिरर्थैः शब्दानां संबंधो योग्यता तथा॥३८॥ ॥इंद्रियाणां चक्षुरादीनां स्व
ये विषयेषु चाक्षुषघटादिषु यथानादिर्योग्यता तदीयचाक्षुषादिकारणता तथा शब्दानामपि अर्थैः
सह तद्बोधकारणतैव योग्यता सैव शक्तिरित्यर्थः। ननु तद्बोधकारणत्वमनादिभूतशक्तिः आधु
निकेष्वैत्रादिपदेषु तदभावात्। अन्यथापि पित्रादिसंकेतात्ततोन्यस्यापि बोधप्रसंगः। लाक्षणिकानि
आमेष्वेति संकेतस्तानमपि हेतुर्वाच्यं। तथा चावश्यकत्वात्स एव शक्तिरस्तु स चाधुनिके पित्रादेर्ग
वादेरीश्वरस्येति चेत्। अत्रोच्यते॥ संकेतो न स्वरूपेण हेतुः। अगृहीतशक्तिकाद्यर्थबोधप्रसंगात्। ना
पि सामान्यतो ज्ञातः। प्रमेयत्वादिना तज्ज्ञानेपि बोधप्रसंगात्। नापि संकेतत्वेन तज्ज्ञानं हेतुः। गवा भू॰

के

82

दिपदे धीश्वरादेः संकेतत्वेन तज्ज्ञानानभ्युपगमानां लौकिकमीमांसकादीनां तत्तदर्थबोधजनकत्वग्रहव
तामेव बोधेन व्यभिचारात्। न चार्थधीजनकतावच्छेदकत्वेन तज्ज्ञानं हेतुः। ततोपि लाघवेनार्थ
धीजनकत्वेनैव हेतुतायामस्मन्मतसिद्धेः। न चाधुनिके देवदत्तादौ संकेतज्ञानादेव बोधेनाऽ
स्य व्यभिचारः। तत्रापीदं पदमिममर्थं बोधयत्वितीच्छारूपे पदे तदर्थबोधकत्वस्यावगाहनेन
व्यभिचाराभावात्। न च स्वातंत्र्येणार्थबोधकतात्वं तत्कारणं वाच्यं। अन्यथा नेदं तद्धीजनकमि
व ति ज्ञानतोऽस्माच्छब्दादयमर्थो बुद्ध्यतामिति ज्ञानतस्तद्ग्रहापत्तेरिति वाच्यं। नेदं तद्धीजनकमिति ग्र
हवतो बाधेन पदे परग्रहे ज्ञानतोपि तद्ग्रहासंभवात्। अन्यथाप्रांनिश्चितस्यापि प्रांनत्वापत्तेरिति। इ
दं चार्थधीजनकत्वं पित्रादिसंकेततानादृत्याने अतस्तज्ज्ञातानात्पूर्वेण बोधः। नापि लाक्षणिकोच्छेदा
पत्तिरिष्टत्वात्। शक्तिग्राहकव्यवहारस्य मुख्यलक्ष्यसाधारण्यात्। किंच मत्स्यसादिजन्योपस्थितेः

83

शाब्दबोधानंगत्वात् शाब्दबोधं प्रति शक्तिजन्योपस्थिते र्लक्षणाजन्योपस्थितेश्च कारणत्वं वाच्यं। त
५२ थाच कार्यकारणभावद्वयकल्पने गौरवं स्यात्। अस्माकं पुनः शक्तिजन्योपस्थितित्वेनैव हेतुतेति ला
घवं। अपि च लक्षणा इति स्वीकारे कार्यकारणभावस्य प्रत्येकं व्यभिचारः। शक्तिजन्योपस्थितिं विनापि
लक्षणाजन्योपस्थितितः शाब्दबोधात्। न चाव्यवहितोत्तरत्वसंबंधेनोपस्थितिमत्त्वं कार्यता न.
वच्छेदकं न तु उपस्थितित्वे च कारणतावच्छेदकं। अनेन कार्यकारणभावप्रसंगात्। किंच पदार्थोपस्थि
तिं प्रत्यपि शक्तिज्ञानत्वेन लक्षणाज्ञानत्वेन च हेतुतेति व्यभिचारो गौरवं च। तत्र त्वदेव दूषयंति न चेदं
पदमेतदर्थबोधकमिति शक्तिज्ञानकार्यकारणभावकल्पनेपि पदतदर्थभेदेनानेककार्यकारण
भावकल्पने गौरवं तवापि समं। परस्परं व्यभिचारवारणायाव्यवहितोत्तरत्वघटितत्वे च सुतरामि
तिवाच्यं। शक्तिभ्रमानुरोधेन न तत्पदतदर्थभेदेन कार्यकारणभावानंत्यस्य तवापि साम्यात्। ५२

लक्षणाकार्यकारणभावकल्पनागौरवं परं न चातिरिच्यते। अपर इति जन्योपस्थितित्वेनैव शाब्दबोधहे
तुता इति ज्ञानत्वेन च पदार्थोपस्थितिकारणतेत्येवं मया वाच्यमिति चेन्न। शक्तिलक्षणान्यतरत्वस्य
शाब्दबोधहेतुपदार्थोपस्थित्यनुकूलपदपदार्थसंबंधत्वस्य वा इति तस्य कारणतावच्छेदकत्वात्।
शक्तित्वमपेक्ष्य गौरवात्। शाब्दबोधहेतुतावच्छेदकस्य पदार्थोपस्थितिहेतोरज्ञानेन दुरितकार्यकार
णभावग्रहस्यासंभवात्। अथ ममापि शक्तिज्ञानत्वेनैव हेतुता शक्यसंबंधरूपलक्षणायां ज्ञानेरपि
प्रवेशादिति चेन्न। शक्तिज्ञानपदार्थोपस्थित्योः कार्यकारणभावे समानविषयत्वस्यावश्यकत्वात्।
अन्यथा गंगातीरयोः संबंधाग्रहवतो गंगापदशक्तिज्ञानतो गंगायां घोष इति वाक्यात्तीरबोधप्रसंगः।
शक्तिज्ञानस्येह हेतोः सत्त्वात्। अपि च पदमानयेति वाक्यं हस्तिनं च स्मरतो पदपदार्थादिभ्यो पदादेः गजा
दूक्षिपकस्य च समूहालंबनस्मरणवतो पदानयनवद्हस्तिपकस्यापि शाब्दबोधापत्तिः। समूहालंब

नरूपायां पदार्थोपस्थितेः शक्तिजन्यस्य सत्वात्। तथा च विपर्ययतया णाद्बोधं प्रति तरं शक्तिप्रवर्तकत्वमि

भा१ जन्योपस्थितिर्हेतुरिति वाच्यं। एवं च लक्षणाया अपि शक्तिज्ञानत्वेन हेतुत्वमसंभवदुक्तिकमिति। ए

तेन शक्तिमत्त्वोन्यो वोपस्थितिर्हेतुरिति लक्षणाज्ञानं कार्यकारणभावो न तरं प्रमाणमिति परास्तं। अपो

ज्यत्वस्यानतिप्रसक्तस्य दुर्वचत्वाच्चेत्यादि विस्तरेण प्रपंचितं भूषणे॥२६॥ ननैवं भाष्यादितो बोधकत्व

नाद्दोषकतारूपाशक्तिरलं वाच्या स्यात्तथा च साधुनापि स्यात्। शक्तत्वस्यैव साधुता याप्याकरणापित्तर

णे प्रतिपादनादित्याशंकां हि प्राप्तमाप्यते॥ ॥असाधुरनुमानेन वाचकः कैश्चिदिष्यते॥ वाचकत्वावि

शेषेण नियमः पुण्यपापयोः॥२७॥ ॥असाधुः गाव्यादिः अनुमानेन साधुशब्दप्रयु[illegible]मान एव वाचकः

बोधकः कैश्चिदिष्यते॥ तथा च श्चिदिति तेषां साधुस्मरणएवोपयोगो न तु साक्षात्तद्वाचकत्वमतो न साधु

त्वमिति भावः। अतो हि वाक्यपदीये। ते साधुष्वनुमानेन प्रत्ययोत्पत्तिहेतवः। तादात्म्यमुपगम्येव शब्दा भा१

र्थस्य प्रकाशकाः॥ न शिष्टैरनुगम्यंते पर्याया इव साधवः। न यतः स्मृतिमात्रेण तस्मात्साक्षादवाचकाः

अंबांबेति ॥अंबांबेति यदा बालः शिक्षमाणः प्रभाषते। अव्यक्तं तद्विदां तेन व्यक्ते भवति निर्णयः॥ एवं साधो प्र

योक्तव्ये योपभ्रंशः प्रयुज्यते। तेन साधुव्यवहितः कश्चिदर्थोऽभिधीयत इति। तन्न अपभ्रंशानां साक्षाद्वा

चकत्वे किं मानं। शक्तिकल्पकव्यवहारादेस्तुल्यत्वादिति चेत्तर्हि तत्तद्देशभेदेन भिन्नेषु तेषु शक्ति

कल्पने गौरवात्। न च पर्यायतुल्यता शंक्या। तेषां सर्वदेशेष्वेकत्वाद्धि निगमनाविरहेण सर्वत्र शक्ति

कल्पना। न त्वपभ्रंशेन तथा। अन्यथा भाषाणां पर्यायतया गणनापत्तेः। एवं च शक्तत्वमेवास्तु साधुत्व

मिति नैयायिकमीमांसकादयः। नामते नैव द्रष्टव्यं। इदानीं स्वमतमाह। वाचकत्वाविशेषेणेति। अपभ्रं

शः। अपभ्रंशानामशक्तत्वेन तज्जो बोध एव न स्यात्। न च साधुस्मरणात्तज्जो बोधः। ज्ञानविदुषां पामराणा

मपि बोधात्। तेषां साधोरबोधाच्च। न च शक्तिभ्रमात्तेभ्यो बोधः। बोधकत्वस्याबाधेन तद्भ्रमस्याप्रम

लात्। ईश्वरेच्छा शक्तिरिति मतेऽपि सम्बन्धावच्छिन्नविषयिताकत्वस्याबाधाभावात्। एतेनैः परपदार्थविशेषप्रतिता
४४ याऽपभ्रंशानां भवाच्छ। अपभ्रंशवाचकत्वपरीक्षे। पारम्पर्यादपभ्रंशा विगुणेष्वभिधातृषु। प्रसिद्धिमागता येषु तेषां सा
धुरवाचकः॥ दैवी वाग्व्यवकीर्णेयमशक्तैरभिधातृभिः। अनित्यदर्शिनां त्वस्मिन्वादे बुद्धिविपर्ययः॥
अवाचकः अबोधकः बुद्धिविपर्ययः। एतेन एव वाचकाः नान्ये इति विपर्ययरूपोऽर्थः॥ ...विनिगमना
विरहादुभयोरपि शक्तिः। न च तासां नानात्वे दोषः। संस्कृतवन्महाराष्ट्रभाषायाः सर्वत्रैकत्वेन मते
ऽप्येकेऽपि विनिगमनाविरहस्य तादवस्थ्यात्। किं चानुपूर्वीभेदेः वच्छेदिका। सा च पर्यायेष्विव भाषास्वप्यन्यान्ये
वेति कल्पयोर्विशेष इति विभावनीयं सूरिभिः। तथा च संस्कृतवद्भाषाशब्दाः शक्ता एवान्ये च पर्यायवत्तया
भाषाणां गणनापत्तिः। साधूनामेव वाचकत्वे शब्दे विभागाभिधानात्। अन्येषां साधुनां नेयोऽस्यादिस्वत आह वि
न२ धमइति। पुण्यजनकबोधनायैव साधूनां साधुभिर्भाषितव्यमिति विधिः। पापजनकबोधनायैवासाधुभि ४४

रिति निषेधः। तथा च पुण्यजनकबोधनयोग्यत्वं साधुत्वं। पापजनकबोधनयोग्यत्वमसाधुत्वं। तच्च जनकतावच्छेदि
का च जातिरुक्ताव्यापकं च कोशादिव्याकरणादिना। एवमेव च राजसूयादेर्ब्राह्मणे फलाजनकत्ववद्वा
दिशब्दानां नाम्नादेरसाधुत्वमिति संगच्छते। आधुनिकदेवदत्तादिनाम्नामपि ह्युस्तरमित्यादिभाष्येण
व्युत्पादितत्वात्साधुत्वं। एवं च यः शब्दो यत्रार्थे व्याकरणे व्युत्पादितः स तत्र साधुरिति पर्यवसितं। गोणा
नां गुणे व्युत्पादनात्तु रकारेण मरुत्तौ साधुत्वमेव। आधुनिकत्वात् लाक्षणिकानां त्वसाधुत्वमिष्टमेव।
अत एव ब्राह्मणायपरेहांस्यर्थे ब्राह्मणं देहीत्यादिकं लक्षणयाऽप्यसाधुरित्यादि विस्तरेण प्रपंचितं भूष
णे॥ २७॥ अतिरिक्तशक्तिग्रहोपायमाह॥ ॥संबंधशब्दे संबंधो योग्यतां प्रति योग्यता। समयाद्योग्य
तासंविन्मातापित्रादियोग्यवत्॥ २८॥ ॥संबंधो विषयः। योग्यतां प्रति योग्यताशब्दं प्रति योग्यताविष
यकृति। समयात् व्यवहारात्। योग्यतासंवित्। शक्तिग्रहः। घटपदमस्य योग्यमेतत्संबंधीति व्यवहारात्

त्वाम्नात्वेत्यर्थः ॥ ३८ ॥ ॥ इति श्रीवैयाकरणभूषणसारे शक्तिनिर्णयः समाप्तः ॥ ॥ नञर्थमाह ॥ ॥ न
५५ ञ्समासे चापरस्य प्राधान्यात्सर्वनामता ॥ आरोपितत्वं नञ्द्योत्यं न ह्यसोप्यतिसर्ववत् ॥ ३९ ॥ ॥ नञ्समा
से अपरस्य उत्तरपदार्थस्य प्राधान्यात्सर्वनामता सिद्ध्यतीति शेषः । अत एवारोपितत्वमेव नञ्द्योत्यम
भ्युपेयमिति शेषः । अयं भावः । असर्व इत्यादावारोपितः सर्व इत्यर्थे सर्वशब्दस्य प्राधान्याच्चात्स
र्वनामता सिध्यति । अन्यथा ऽतिसर्व इत्यत्रेव सा न स्यात् । घटो नास्तीत्यादावभावविषयकबोधे तस्य
विशेष्यताया एव दर्शनात् । अस्मद्रीत्या च स आर्थो बोधो मानसः । तथा चासर्वस्मै इत्यादावसिद्धिप्रसं
ग इति । अत्र चारोपितत्वमारोपविषयत्वं । आरोपमात्रमर्थो विषयत्वं संसर्ग इति निष्कर्षः । द्योत्यत्वोक्ति
र्निपातानां द्योतकत्वमित्यभिप्रेत्य ॥ ३९ ॥ घटो नास्ति अब्राह्मण इत्यादावारोपबोधस्य सर्वानुभवविरु
द्धत्वात्पक्षांतरमाह ॥ ॥ अभावो वा तदर्थोऽस्तु भाष्यस्य हि तदाशयात् । विशेषणं विशेष्यो वा न्यायत ५५

त्वव धार्यताम् ॥ ४० ॥ ॥ तदर्थः । नञर्थः । अयं पदं द्योत्यत्ववाच्यत्वपक्षयोः साधारण्येन कीर्तनाय । भाष्य
स्येति । तथा च नञ्सूत्रे महाभाष्ये निवृत्तपदार्थक इति । निवृत्तं पदार्थो यस्य । नपुंसके भावे क्त इति क्तः । अ
भावार्थक इत्यर्थः । यत्तु निवृत्तः पदार्थो यस्मिन्नित्यर्थः सारूप्यादिना ऽऽरोपितब्राह्मण्यः क्षत्रिया
दिर्योऽर्थो यस्येत्यर्थ इति कैयटः । तन्न । आरोपितब्राह्मण्यस्य क्षत्रियादेर्नञा वाच्यत्वात् । अन्यथा सार
श्यादेरपि वाच्यतापत्तेः । यत्तु तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता । अप्राशस्त्यं विरोधश्च नञर्थाः
षट् प्रकीर्तिता इति पठित्वा अब्राह्मणः अपापं अनश्वः अनुदरा कन्या अपशवो वा अन्ये गोअश्वेभ्यः अधर्म
इत्युदाहरंति तन्न आर्थिकार्थमभिप्रेत्येति स्पष्टमन्यत्र । विशेषणमिति । प्रतियोगिनीति शेषः । तथा च
सर्वपदे सर्वनामसंज्ञा । अनेकमन्यपदार्थे इत्यनेनेकवचनांतानां गवेत्यादावेकशब्दार्थप्राधान्यादे
कवचननियमः । अब्राह्मण इत्यादावुत्तरपदार्थप्राधान्यान्नस्युरुपत्वं अत्वंभवसि अनहंभवामि इत्या

देशे पुरुषवचनादिव्यवस्था चोपपद्यते। अन्यथा त्वद्भावो मद्भाव इति वद्भावांशे युष्मदस्मदोरन्वयेन पु
४९ ष्मत्सामानाधिकरण्यस्यातिङः सत्त्वात्पुरुषव्यवस्था न स्यात्। अस्मन्मते चारोपे प्रतियोगित्वे भिन्ना
श्रयिकाभवनक्रियेत्यन्वयात्सामानाधिकरण्यं नानुपपन्नमिति भावः॥ विशेष्यो वेति। प्रतियोगिनो
विशेषः। अयं भावः। गौणत्वेपि नञ्समासे एतत्तदोः सुलोपोऽकोरनञ्समासे हलि। इति ज्ञापकात्सर्वनामसं
ज्ञा नानुपपन्ना। अतः शिव इत्यत्र सुलोपवारणाय नञ्समास इति हि विशेषणं। न च नञ्तत्पुरुषस्य
सर्वनामतास्ति गौणत्वात्। अकोरित्यकज्ञापितस्य प्राधान्यस्य सर्वनाम्नो रेव तत्र ग्रहणात्साभात्। तथा चा
नञ्समास इति ज्ञापकं तु वचं अनेकमन्यपदार्थ इत्यादावेकवचनं विशेष्यानुरोधात्। सुवामंत्रि
ते पराङ्गवत्स्वरे इत्यतोनुवर्तमानं सुब्ग्रहणं विशेष्यमेकवचनान्तमेव। किंचानेकशब्दात् द्विवच
नोपादाने बहूनां च बहुवचनोपादाने द्वयोर्बहूनां हि न सिद्ध्येत्। उभयसंग्रहायैकवचनं ज्ञास्यभि ४९

प्राये गौत्सर्गिकं चास्ति व्यनेनेकयेस्य चापि योपपेति विशेष्यानुरोधात्स्यैकं सेवनान्वयबोधनाय चै
कवचनं न तु तत्र पदार्थप्राधान्यमयुक्तं। अत एव पतं स्यनेके जलधेरिवौर्मयपरत्वादिकमपि सुपपा
दं। अत्तं भवसीत्यादौ युष्मदस्मद्भिन्नेलक्षणा। नञ्द्योतकः। तथा च भिन्ने नञ्युष्मदर्थेन तिङः सामा
नाधिकरण्यात्पुरुषव्यवस्था तद्भिन्नाश्रयिकाभवनक्रियेति शाब्दबोधः। एवं नपचसीत्यत्र
त्वद्भिन्नाश्रयकपाकानुकूलभावनाभावः। परो नास्तीत्यत्र पराभिन्नाश्रयिकास्तित्वाभाव इति
रीत्या बोधः। असमस्तनञः क्रिययामेवान्वयात्। स चाभावो त्वंताभावत्वादिरूपेण शक्यः तत्तद्रू
पेण बोधादिति स्वानुग्रन्थविस्तरः॥ ५० ॥ ॥ इति श्रीवैयाकरणभूषणसारे नञर्थनिर्णयः समाप्तः॥ ॥
॥ ॐ॥ नत्वा। शारदायोतनकापूर्वाद्योतावरका इति नैयायिकमतमयुक्तं वैषम्ये बीजाभावादिति च नत्व
न्निपातानां द्योतकत्वं समर्थयते॥ ॥द्योतकाः प्रादयो येन निपाताश्चादयस्तथा। उपास्येते हरिहरौ ल

कारोरस्यनेयथा॥४१॥ ॥येनहेतुनाप्रादयोद्योतकास्तेनैवहेतुनाचादयोनिपातास्तथाद्योतकाइत्यर्थः॥
५७ अयंभावः।ईश्वरमनुभवतीत्यादावनुभवादिःप्रतीयमानोनधात्वर्थःभवतीत्यस्याप्यापत्तेर्नोपसर्गा
र्थः।तथासत्यप्रकृत्यर्थतयातत्रान्वयानार्थानन्वयापत्तेः।प्रत्ययानांप्रकृत्यर्थान्वितस्वार्थबोधक
त्वव्युत्पत्तेः।अनुगच्छतीत्यादावनुभवादिप्रत्ययापत्तेश्च।नविशिष्टार्थःगौरवात्।तथाचधातोरेव
विशेषमानत्वादिनाचकत्वात्तुलक्षणा।उपसर्गत्वात्यर्थग्राहकत्वस्तुतथाचतात्पर्यग्राहकत्वमेवद्यो
तकत्वमिति।तत्रादिवपितुल्यं चैवमिवपश्यतीत्यादौसादृश्यविशिष्टं चैत्रपदलक्ष्यमिवपदस्तात्प
दि र्यग्राहकइत्यस्यास्तुवचनत्वात्।निस्वयंयुक्तंनरताह।अपास्येनेदंति।अत्रद्युपासनाकिंयुपसर्गार्थःविशि
ष्टस्यधातुमात्रस्यवाच्यत्वात्।तथासतिस्वार्थफलव्यधिकरणव्यापारवाचकत्वरूपसकर्मकत्वस्य
अस्त्यधातोरुपासनारूपफलवाचकत्वाभावात्नापत्तेर्नतःकर्मणिलकारोनस्यात्।नद्वितीयः।गौर ५७

वात्।न्तनीयेत्यागतेद्योतकत्वं।नात्पर्यग्राहकत्वत्साभादितिभावः।इत्यनेनइत्यत्रकर्मणीतिशेषः॥४१॥त
त्रादिवपितुल्यमित्याह॥ ॥तथात्यत्रनिपातेपिलकारःकर्मवाचकः।विशेषणाद्ययोगोपित्रादिव
त्रादिकेसमः॥४२॥ ॥अन्यत्रासाक्षात्क्रियतेऽलंक्रियतेकृतेक्रियतेशिवइत्यादौ।अत्रापिधातोर्ल
तदर्थेकर्मणिलकारसिद्ध्यर्थंतत्तदर्थवाचकत्वंवाच्यमिति।उपसर्गवद्द्योतकत्वमभीप्सामपीत्यर्थः।य
द्यपिकृधातोःसकर्मकत्वमस्त्येवतथाप्येवमर्थेत्वसकर्मकत्वान्नस्यात्।अन्यथावायुर्भिकुरुतेसैंधवा
दिकुर्वतेइत्यत्रापित्यादितिभावः।अयोपासनासाक्षात्कारादिर्निपातार्थोस्तुसाक्षात्त्वस्यतुल्य
योरितिकोशस्वरसात्तदनुकूलोव्यापारएवधात्वर्थोस्तु।स्वस्वयुक्तनिपातान्यतरार्थफलव्यधिकर
णव्यापारवत्त्वंसकर्मकत्वमपिसुवचमितिदृष्टांतदार्ष्टांतिकावयुक्तावितिनेदंसाधकमितिचेन्ना
मार्थधात्वर्थयोर्भेदेनसाक्षादन्वयासंभवात्निपातार्थधात्वर्थयोरन्वयस्यैवासंभवात्।अन्यथानंदु

त्तः।प्रकृतीत्यवाचिकर्मतासंबंधेनतंदुलानांधात्वर्थेःन्वयापत्तेरिति।किंचप्रादीनांवाचकत्वेभूयान्स्यकर्थः
४९ कीदृशोनिष्कपदइतिवद्याच्यकीदृशोनिरित्यपिस्यात्॥अस्मन्मतेप्रादेरनर्थकत्वान्नतदन्वयदृत्सत
एवद्योतकत्वान्नेयंस्यादित्तिसाधकांतरमाह।विशेषणेति।शोभनःसमुच्चयोद्रष्टव्यइतिवत्शोभन
श्चद्रष्टव्यइत्यस्याप्यापत्तेस्तुल्यसमाधेयत्वादितिभावः॥अपिच।निपातानांवाचकत्वेप्रातिपदि
कार्थयोर्विनापयादिकंभेदेनान्वयासंभवः।अन्यथाएनाशुरुवद्दत्त्वप्राप्यापत्तेरित्यभिप्रेत्याह।
आदीति।धवखदिरयोःसमुच्चयइतिवद्धवस्यचखदिरस्यचैत्वेवस्यादितिभावः॥४२॥ननुप्राति
पदिकार्थयोर्भेदेनान्वयबोधेविभक्तिजन्योपस्थितिर्हेतुरितिकार्यकारणभावोनिपातातिरिक्त
विषयएवेतिनोक्तदोषइत्याशंक्याह॥ ॥पदार्थःसदृशान्वेतिविभागेनकदाचन।निपातेनतरसंको
चेप्रमाणंकिंविभावय॥४३॥ ॥सदृशासदृशेनसमानाधिकरणेनेतियावत्।अन्वेति।अपभेदेनेतिशेषः। ४९

विभागेन।असदृशेनअसमानाधिकरणेनेतियावत्।अयमर्थः।समानाधिकरणप्रातिपदिकार्थयो
र्भेदान्वयव्युत्पत्तिर्निपातातिरिक्तविषयेतिकल्पनेमानाभावोगौरवंच।अस्माकंनिपातानांद्योतक
त्वादन्वयएवनास्ति।तिनायंदोषः।अतएवघटोनास्तीत्यादौघटपदंतत्प्रतियोगिकेलाक्षणिकमिति
नैयायिकाः॥४४॥अपिचनिपातानांवाचकत्वेकार्यादावन्वयोनस्यादितिसाधकांतरमाह॥ ॥
शरैरुस्रैरिवोदीच्यानुद्धरिष्यन्रसानिव।इत्यादावन्वयोनस्यात्सुपांचम्प्रवर्णततः॥४५॥ ॥उस्र
सदृशैःशरैःरससदृशानुदीच्यानुद्धरिष्यन्नित्यर्थः।अयंचोल्लासादिशब्दानांतुल्यसदृशपरत्वेइव
शब्दस्यद्योतकत्वेसंगच्छते।अन्यथाप्रत्ययानांप्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्पत्तिविरोधः।तथाहि।
उस्रैरितिकरणेतृतीया।नचोस्रोःचकरणं।इवार्थसदृशस्यकरणत्वेपितत्करणत्वंनानेनप्रत्ययेन
बोधयितुंशक्यं।अप्रकृत्यर्थत्वात्।इवशब्दस्यचासत्त्वार्थकतयातदुत्तरंतृतीयायाअसंभवात्।सं

भवेत्वाश्रवणप्रसंगात्। उत्तरपदोत्तरत्वनीपानन्वयप्रसंगाच्च। त्याह। सुपां चेति। सुपामश्रवणं चेत्यर्थः। चका
५९ रस्य पदोत्तरत्वनीपानन्वयः समुच्चीयते। इत्याहानिपातादिपदार्थाभिन्नसंबंधो पातैनीपरमेश्वरौ तद्वे दृ
दृश्य च वाग्यर्थयोर्वैदिककर्मत्वाभावात् दुष्टत्वमिति। पापा अनन्वय इत्यर्थस्य कर्मत्वबोधकासंभवश्च संग
च्छते। परि च विशेषण विभक्तिरभेदार्थिका साधुत्वमात्रार्थिका वा तदापि वपएवस्य वाचकत्वेऽनन्वयएव
स व। उक्तं दृशएरण्यांसमानाधिकरणपदोपस्थाप्यतयाऽभेदेनान्वयायोगात्। चाधारभेदेनापि नसः। न
त्वत्राभिन्नसदृशा भिन्नाः परइत्यर्थोऽदृष्टत्वाः॥५४॥ ननु लभ्यते अत्रास्य णइत्यादौ तत्पुरुषलक्षणा
व्याप्त्यापत्तिः। पूर्वपदस्यानर्थकत्वेनोत्तरपदार्थप्राधान्याभावात्। उपसर्गस्यार्थवत्त्वाभावेन प्राति
पदिकत्वाभावाद्विभक्तिश्च ततो नस्यादित्याह॥ ॥नञ्समासे चापरस्य यो लंप्रत्येव समुच्चयता॥ द्यो
त्यमेवार्थमादाय तत्रायं तेनामनःसुपपा॥५५॥ ॥नञ्समासादौ योत्तरपदप्रधानता सा द्योत्यार्थमा ५९

त्व

५८

दायैवानमेवार्थमादायार्थवत्त्वात्प्रातिपदिकत्वमित्यर्थः। वस्तुतस्तत्त्वव्यापारांशुपरतितापकात्सुस्म
तिः। निपातस्यानर्थकस्येति वार्त्तिकाद्वा प्रातिपदिकत्वं। कृतद्धितसमासाश्चेत्यत्र तु कृत्समुच्चायक
चकारेण निपातानां संग्रह इति वा बोध्यं। तस्मात् युक्तं निपातानां द्योतकत्वं। उक्तं वाक्यसुधिकरणमा
र्निके। चतुर्विधे पदे चात्र द्विविधस्यार्थनिर्णयः। क्रियते संशयो त्वत्तेनोपसर्गनिपातयोः। तयोरर्थाभि
धाने हि व्यापारो नैव विद्यते। यस्त्वर्थद्योतकौ तौ तु वाचकः स्वविचार्यतामिति। उपसर्गेण धात्वर्थो बलाद
न्यत्र नीयते। प्रहाराहारसंहारविहारपरिहारवत् इति स्त्रीकावुपसर्गपदं निपातोपलक्षणं धातुप
दं पदान्तरोपलक्षणमिति बोध्यम्॥५५॥ ननु अन्वयव्यतिरेकाभ्यां निपातानां तत्तदर्थवाचकत्वमेव
युक्तं। बोधकतारूपशक्तेरवाधाद्वा किंचोत्तरीसापचनीत्यादौ धातोरेव कर्तृविशिष्टभावनायां लक्ष
णास्तु तात्पर्यग्राहकत्वं निङादेःस्यादित्यरुचेः पक्षान्तरमाह॥ ॥निपातानां वाचकत्वमन्वयव्यतिरे

११

कृयोः।युक्तं चानन्तु तद्युक्तं परेषां मतमेव नः॥४८॥ ॥एवं च धात्वर्थप्रातिपदिकार्थयोर्भेदेनान्वयबो
५९ धोन युज्यन्त इति निपातातिरिक्तविषयं समानाधिकरणप्रातिपदिकार्थयोरभेदेनान्वयस्यापि नये
त्यगत्याकल्पनीयमिति भावः॥नतिनि।नैयायिकैर्मतं प्रादिचाद्योर्वैषम्यमित्यर्थः।यत्तु सर्वेषां नि
पातानां वाचकत्वेऽर्थवत्त्वेनैव तेषां प्रातिपदिकत्वसंभवान्निपातस्यानर्थकस्येति विधिवैयर्थ्यं।
सर्वेषां द्योतकत्वे चानर्थकस्येत्यस्य वैयर्थ्यं।तथा च केचित् द्योतकाः केचिद्वाचका इत्यभ्युपेयमिति तन्न।
धो एवं हि चादयो द्योतकाः प्रादयो वाचका इति वैपरीत्यावारणात्सर्वेषामनर्थकानां पादपूरणमात्रार्थमु
पात्तानां संग्रहाय वार्त्तिकारंभस्य वैयर्थ्यापत्त्याश्च तस्य प्रत्याख्यानत्वाच्च।परेषामिति चतुर्थ
चनं मीमांसकसंग्रहाय केवलस्य इन्द्रात्समुच्चयाद्योधाच्चकारस्य वर्णेन द्योधाच्चकार एव तद्द्योत
कोन द्योतकः।किं च द्योतकत्वे पदांतराणां तत्र शक्तिः कल्प्या चकारादेर्द्योतकत्वशक्तिश्च कल्प्येति गौ ५९

रवं स्यादिति हि समुच्चयाधिकरणे स्थितं।तदपि न युक्तमिति भावः।तथा हि।अन्वयव्यतिरेकाभ्यां नास्त्यर्थप्रा
हकत्वेनाप्युपयुक्तोपसर्गादिपदानामेव च समुच्चितेलक्षणा।तात्पर्यग्राहकः प्रकरणादिवच्चादिरिति
स्वीकारान्न शक्तिद्वयकल्पनापि।अस्माकं तु लक्षणाग्रहद्वयोश्चोपात्तत्वकार्यकारणभाव आवश्य
कः।एवं शक्तिग्रहस्यापीति पक्षद्वयेपि कल्प्यांतराभावेन गौरवाभावादिदमुभयमपि युक्तमित्यभि
मतं।अत एव स वाचको विशेषाणां संभवात् द्योतकोपि वेति चावयपरीत्यमपि संगच्छते।दर्शनां
री तरीयैस्याद्वाचकत्वमेव द्योतकत्वमेवेति नियमस्तु न युक्त इति ध्वनयन्नाह।मतमेवेति॥४९॥पर्य
वसितमुपसंहरन्नाह॥ ॥निपातत्वं परेषां यत्तदस्माकमिति स्थितिः।व्यापकत्वाच्चद्युक्तं नायात्ल
वच्छेदकमिष्यते॥५०॥ ॥परेषां यत् निपातत्वं असत्वार्थकत्वे सति चादिगणपठितत्वं शक्तिसं
बंधेन निपातपदवत्त्वं वोपाधिर्जातिर्वा तदेवास्माकमपि परं तु सामान्यधर्मे प्रमाणानां पक्षपा

ता द्युक्तनाद्योतकत्वावातदर्थ एवेदेनैवकल्प्येतिनैपातिको तं प्रादिक्रयोर्वैषम्यमयुक्तमित्यर्थः॥ व्या
५१ पकत्वात्सामान्यत्वात् एकत्वात् सुपलक्षणं। द्योतकत्वापावेत्यपि द्रष्टव्यं॥४७॥ ॥इतिश्रीवैया
करणभूषणसारे निपातानां द्योतकत्वादिनिर्णयः समाप्तः॥ ॥भावप्रत्ययार्थमाह॥ ॥कृत्तद्धित
समासेभ्यो मतभेदनिबंधनं॥ त्वतलोरर्थकथनं टीकायां हरिणाकृतम्॥४८॥ ॥कृत्तद्धितसमा
सेभ्यः संबंधाभिधानं भावप्रत्ययेनान्यत्र रूढ्यभिन्नरूपाव्यभिचरितसंबंधेभ्य इति वार्तिकं वच कार
नमिति मीमांसकादीनां भ्रमप्रमापाकुर्वन्नाह टीकायामिति। भर्तृहरिणा महाभाष्यटीकायामित्यर्थः॥
त्वतलोरिति भावप्रत्ययमात्रोपलक्षणम्। अयमर्थः। समासादौ ग्राहकैः कल्प्यमाना राजादिसंबंध
विशिष्टे रूढ्यत इत्युक्तं। तत्पाचनदुनरभावप्रत्ययः संबंधे वदतीत्यर्थः।एतदपि भेदः संसर्गउभयं वे
द्युके द्रव्यस्तेन संभवतीत्यत आह। मतभेदेति। पक्षभेदेनेत्यर्थः। एवं च राजपुरुषत्वं औपगवत्वं पक्त ५१

सुपक्षेषु भे

902

त्वमित्यादौ स्वस्वामिभावः अपत्यापत्यवत्संबंधः क्रियाकारकभावसंबंध इत्यन्वयश्चोध्यः। औपगवाद
व्यभिचरितसंबंधे त्वतलौ न रूढिनिरूढितउदाहार्यः। दामोदरत्वं कृष्णसर्पत्वमित्यादौ जातिविशेषे
णबोधादाह। अन्यत्रेति। रूढेरभिन्नरूपादव्यभिचरितसंबंधेभ्यश्चान्यत्रेत्यर्थः॥ रूढिरुक्ता। द्वि
तीयं यथा। शुक्लत्वमत्रतदस्यास्त्यस्मिन्निति विहितमतुपो गुणवचनेभ्यो मतुपो लुगिष्ट इति लुप्त
त्वान्नद्विनांनत्वेपिपटः शुक्ल इत्यभेदप्रत्ययाद्गुणस्यैव प्रकारत्वेन भानं जायते। तृतीये। सत्तो भावस्त
नेति। अत्रजानात्येव प्रत्ययइति दिक्॥४८॥ इंद्रीत्यादौ प्रकृत्यर्थविशिष्टद्रव्यमात्रवाचकत्वात द्वित
स्येति चरं नेम्। मीमांसकं प्रत्याह॥ ॥अत्राईजरतीयं स्याद्दर्शनांतरगामिनां॥ सिद्धांते तु स्थितं पक्षद्वयं
तादृशुनच्छृणु॥४९॥ ॥अत्र भावप्रत्ययविषये तथाहि। दामोदरत्वं परत्वमित्यादिषु पितरभिधाने
नस्यात्। प्रकृतिजन्यबोधे प्रकारः प्रकृत्यर्थसमवेतो हि तदुत्तरभावप्रत्ययेनाभिधीयते। अन्यथाघ

दौ भावप्रत्ययस्य संबंधाभिधायकत्वेन मीमांसकानां दंडितमिष्टा

903

[illegible]

[illegible]

धरत्वादिद्वयम्।पक्षांतरमाह।यद्वेति।यद्वासर्वेभावाःस्वेनार्थेनभवंतिसतेषांभावइतिवार्त्तिककारो
५१ क्तेःयद्वाशब्दत्वस्यनप्रयोजनकोपि।भवनक्रियाकर्तृत्वेनप्रवर्तंतइतिभाष्यार्थः।शब्दाःस्वेनस्वरूपेणा
र्थेनभवंतिप्रवर्तंते।नतुतेषांभावःप्रवृत्तिनिमित्तमित्यर्थः॥अयंभावः।अर्थवच्छब्दोविद्यमप्र
कारः।हरिहरनलेक्ष्वाकुयुधिष्ठिरवसिष्ठादिशब्देभ्यस्तत्तदाख्यःकश्चिदासीदितिशब्दप्रकारक
बोधस्यसर्वानुभवसिद्धत्वात्।अन्यथावनौषधिवर्गादेर्नागरिकान्प्रत्यबोधापत्तेश्च।एवमेवाप्रसि
द्धार्थकपदेष्वनुभवःसर्वसिद्धः।नतुपशुत्वादिपदेष्विवतत्तज्जात्यादिरूपेण।तथाबोधेपदमवच्छेदकं।य
स्यतथाशक्तिग्रहस्तस्यजात्यादिरूपेणैवबोधस्थितिःपदप्रकारकशक्तिग्रहस्तुविशिष्यनापेक्षितः।
किंत्विदंपदंक्वचिच्छक्तंसाधुपरत्वादित्यादिरूपएवापेक्ष्यतइतिविशिष्याग्रहे।नशक्तिकेभ्यस्तथैव
बोधः।तथाचशब्दोपिप्रत्ययार्थइतिप्रपंचितंभूषणे॥५१॥ ॥इतिश्रीवैयाकरणभूषणसारेभात ५१

प्रत्ययार्थविचारःसमाप्तः॥ ॥सास्यदेवतेत्यत्रदेवताविशिष्टेदेयंप्रत्ययार्थः॥ऐंद्रंवैश्वदेवं।त्यादाविं
द्रादेर्देवतात्वोपस्थापकान्तराभावात्तेनरूपेणोपस्थितयेशक्तिःकल्प्यताम्।व्यापकत्वात्।अतएवामि
क्षांदेवतायुक्तांवदत्येवैषनहिकः।आमिक्षापदसान्निध्यात्तस्यैवविधेयार्पणमिति।केवलादेवतावा
चीनहिलोग्नेःसमुच्चरन्।नान्यपुक्ताग्निर्देवत्वंप्रतिपादयितुंक्षमइतिचमीमांसकैरप्युक्तमित्या
शयेनाह॥ ॥प्रत्ययार्थस्यैकदेशेप्रकृत्यर्थोविशेषणं।अभेदश्चात्रसंसर्गआग्नेयादावितिस्थितिः॥
देवतायांप्रदेयेचत्वंदशःशक्तिरस्तुवा॥५२॥ ॥एकदेशेदेवतारूपेतत्रविशेषणमभेदेनेत्याह।अ
भेदश्चेति।ननुदेवतायाःप्रत्ययार्थैकदेशत्वान्नप्रकृत्यर्थस्यतत्राभेदेनान्वयइत्याशयेनाह।देवता
यामिति।तथाचपदार्थैकदेशेनैवनान्वयइतिभावः॥५३॥नन्वग्न्यादिदेवस्यप्रकृत्यैवलाभान्नतत्रश
क्तिःकल्प्या।नचदेवतात्वरूपेणोपस्थितयेसाकल्प्यते।प्रकृतेर्लक्षणयैवतथोपस्थितिसंभवात्।

उपसर्गाणांद्योतकत्वनयेभजपतिरित्यत्रप्रकृत्यन्वयवदित्यभिप्रेत्याह॥ ॥प्रदेयएवचाशक्तिःप्रकृते
५७ स्त्वलुलक्षणादेवतार्थेनिरूढेतिसर्वेप्रत्ययाअमीस्थिताः॥५२॥ ॥ऐन्द्रंदधीत्यादौद्रव्यस्यपरं
तरास्वात्मातुनःपुनःप्रत्ययस्यतत्रशक्तिःकल्प्यतइतिवाच्यंपदांतराश्रवणेपितत्प्रतीतेः।ऐन्द्रंदधी
तिसामानाधिकरण्याच्च।अन्यथाख्यानस्यापिकर्तृकर्मसंज्ञाचित्त्वंनस्यात्।मीमांसकानांपुनःप्रत्यय
स्यदेवतात्वमेवार्थोस्तुद्रव्यंपदांतरात्।अन्यथाएवंव्याख्यानस्यकर्तृत्वाद्यन्यत्वंमास्त्वितितुनोनशक्य
तेवक्तुमितिदिक्।देवतायांदेवतात्वरूपेण।निरूढेति।अनुपपत्तिज्ञानापूर्वकत्वमनादिप्रयोगात्
छिन्नत्वंचानत्वमितिभावः॥५३॥अनयेवरीत्यान्यत्राप्यवधेयमित्याह॥ ॥क्रीडायांणस्तदस्या
स्तीत्यादावेवैवदिक्स्पष्टा।वस्तुतोवृत्तिरेवेतिनात्रातीवप्रयस्यते॥५४॥ ॥तदस्यांप्रहरणमितिक्री
डायांणस्तत्रप्रहरणविशिष्टाक्रीडाप्रहरणंक्रीडेतिक्रीडामात्रंवाइत्यर्थः।आदिनासोस्यनिवासः ५७

सास्मिन्पौर्णमासीतितस्यास्त्यस्मिन्नितिमतुबित्यादिकंसंगृह्यते।इतिमात्रेतिरिक्तशक्तेःसमर्थः
पदविधिरितिसूत्रात्तत्।कारादुक्तोविचारःशास्त्रांतरीयैःसहतद्रीत्यैवोक्तः।आदेपितप्रकृतिप्रत्य
यार्थमादायपरा।वस्तुनोविशिष्टशक्तैवेवार्थोपस्थितिरित्याह।वस्तुतइति॥५६॥ ॥इतिश्रीकौण्ड
भट्टकृतेवैयाकरणभूषणसारेदेवताप्रत्ययार्थनिर्णयःसमाप्तः॥ ॥इतिप्रसंगात्तत्राभेदैकत्वसं
ख्याप्रतीयतइतिसिद्धांतेतदर्थांतेनोपपादयति॥ ॥अभेदैकत्वसंख्यायाःतत्रभानमितिस्थितिः।क
पिंजलालंभवाक्येपित्वन्यायापायोच्यते॥५७॥ ॥संख्याविशेषाणामभेदेनाविभागेनसत्त्वमभेदै
कत्वसंख्या।उक्तंचवाक्यपदीये।यथौषधिरसाःसर्वेमधुन्याहितशक्तयः।अविभागेनवर्तंतेतांसंख्यां
तादृशींविदुरिति।परित्यक्तविशेषंवासंख्यासामान्यमेवतत्।उक्तंचाभेदानांवापरित्यागात्संख्यात्मा
सतथाविधः।व्यापारजात्मविभागस्यभेदापोहेनवर्तते।अगृहीतविशेषेणयथारूपेणरूपवान्।प्रख्या

यनेन भूतकालादिभेदापोहस्तु गम्यत इति। अस्याश्च तेषां समासादौ भानं न्यायसिद्धमिति शेषः इति मतस्थितिर्वैयाकरणा
५५ नां। अयं भावः। राजपुरुष इत्यादौ राज्ञो राज्ञो राज्ञां वायं पुरुष इति जिज्ञासा जायते। विशेषजिज्ञासा च सामा
न्यज्ञानपूर्विकेति सामान्यरूपेण तत्प्रतीतिः स्यादावश्यकी। अन्यथा तस्यां प्रवृत्तिरिति। तस्या एकत्वेन प्रती
तौ न्यायप्राप्तम्। कपिंजलेति। गणनायां त्रित्वस्यैव प्रथमोपस्थितत्वात् तद्रूपेणैव भानमित्येकत्वस्य सर्वतः प्र
थमोपस्थितत्वमस्तीति भावः। वस्तुतस्तु जिज्ञासैव नानुभवसिद्धा न याल्लेनोक्ताने द्वयोः समानप्रकारकत्वे
न हेतुहेतुमद्भावानन्तद्रूपेणैव वा च्यतास्यादिति ध्येयम्॥५४॥ ॥इति श्रीवैयाकरणभूषणसारे ऽभेदै
कत्वसंख्यानिर्णयः॥ ॥संख्याप्रसंगादुद्देश्यविधेययोः संख्याविवक्षाविवक्षे निरूपयति॥ ॥तस्या
नुद्देश्यगत्वं संख्या प्राप्तं ज्ञानं चेम न यतः। पश्वेकत्वादिहेतूनामाभ्यपणमनाकरं॥५५॥ ॥ग्रहं संमार्ष्टीत
द्देश्यग्रहगतमेकत्वमविवक्षितमितितन्न्यायास्मा कमुद्देश्यविशेषणस्याविवक्षानियमः॥ धातोरित्ये ५५

११०

कत्वस्य विवक्षितत्वात्। एतेन समस्तेभ्यो धातुभ्यः प्रत्ययो यदि। तदा सर्वैर्विनिक्षिप्येत हंहोत्यन्नसुवर्थत्व
रिति शब्दान्तराधिकरणे भट्टपादैरभिधानात्। आर्द्धधातुकस्येड्वलादेरित्यत्रार्द्धधातुकविशेषणस्य
वलादित्वस्य विवक्षितत्वाच्च। एवं पशुनायजेतेति वाक्ये विधेयविशेषणं विवक्षितमित्यपि नियमो न। रदा
भ्यां निष्ठातो नः पूर्वस्य च दद्रस्य च तकारद्वयविधानानापत्तेः। तथा च भिन्नद्रस्य च तकारद्वयलाभो
न स्यात्। आद्गुण इत्यादावेकत्वविवक्षयैवोपपत्तावेकः पूर्वपरयोरित्यत्रैकग्रहणवैयर्थ्यापत्तेश्चेति
भावः। अस्यार्थस्तु संख्या प्राप्तस्यानुद्देश्यगानं ज्ञातं नेयतो मते अतः पश्वेकत्वाधिकरणोक्तहेतूनामाश्र
यणमनाकरं नास्मत्सिद्धान्तसिद्धमिति। आदिनाग्रहैकत्वसंग्रहः॥५५॥ ननु विधेयविशेषणविवक्षाव
श्यकी। अन्यथा सुभ्रुपास्य इत्यादावनेनप्रकारायापत्तेः भिन्नद्रस्य च तकारद्वयवदन्येषामप्यापत्तेः।
एकः पूर्वपरयोरित्यत्रैकग्रहणं चरस्यानिभेदाद्देशभेदवारणायेत्यभिप्रेत्याह॥ ॥विधेये भेदकं तेत्र

१११

न्यतो नियमो न हि। घटैकत्वादिहेतूनामाख्यपणमनाकरं॥५६॥ ॥भेदकं विशेषणं तं च विवक्षितं विशेष
५६ विशेषणं विवक्षितमिति सत्तु न व्याप्यव्यापनः अनुचारस्य नियमो न हि कृचितं चक्रुचिन्नेत्यर्थः। घटैकत्वा
दौ घोहेतुर्वाक्यभेदादित्यस्या व्याख्यपणमनाकरम्॥ एकत्वविशिष्टं घातुं चत्वादित्वविशिष्टमाईं घातुं कं चो
द्विश्यमस्य पेद्गागमारेर्विधिसंभवादिति भावः॥५६॥ ननेवं भिन्नचद्गस्यादौ नकारद्वयलाभो नस्यादित्यत
आह॥ ॥रदाभ्यां वाक्यभेदेन नकारद्वयलाभः। रातिनैर्वाक्निनेनत्वे विधेयभेदकस्य तु॥५७॥ ॥
चकारसूचितं निष्ठातस्य नः पूर्वस्य दकारस्य च नरनिष्ठा वाक्यभेदमादायेव नकारद्वयलाभ इत्यर्थः॥५७॥
॥ ॥इति श्रीवैयाकरणभूषणसारे संख्याविवक्षानिर्णयः समाप्तः॥ ॥क्त्वाप्रत्ययस्यार्थं निरूपय
ति॥ ॥अव्ययकृतो इत्युक्तेः प्रकृत्यर्थानुसारयः॥ समानकर्तृकत्वादियोस्समेया मितिनिस्थितिः॥५८॥
तुमाद्यः तुमुमाद्यः। प्रकृत्यर्थे भावे आदिना क्त्वादेः संग्रहः। भावे इत्यत्र मानमाह। अव्ययकृत इति। ५६

११२

अव्ययकृतो भावे इति वार्तिकादित्यर्थः। ननु समानकर्तृकयोः पूर्वकाल इत्यादिसूत्राणां का गतिरत
आह। समानकर्तृकत्वादीति। अयं भावः। भोक्तुं पचति भुक्त्वा व्रजतीत्यादावेकवाक्यतासर्वसिद्धा भो
जनपाकक्रिययोर्विशेषणविशेष्यभावमन्तरेणानुपपन्ना। अन्वयाभुक्त्वा व्रजतीत्यादावप्येकवाक्य
तापत्तेः। तथा च तयोर्विशेषणविशेष्यभावनिरूपकः संसर्गो जन्यत्वं सामानाधिकरण्यं पूर्वोत्तर
भावो व्याप्यत्वं चेत्यादिरनेकविधः। तथा च भोक्तुं पचति भुक्त्वा व्रजतीत्यादौ भोजनजनिका पाकक्रि
या भोजनजन्या व्रजिरिति बोधः। अत एव जलपानानन्तरं यस्य तत्रोसत्वे पीत्वा नस्त इति न प्रयोगः।
सामानाधिकरण्यस्यापि संसर्गत्वेनाथात्समानकर्तृकत्वमपि लभ्यं भुक्त्वा व्रजतीत्यादौ पूर्वोत्तरभा
वः सामानाधिकरण्यं च संसर्ग इति भोजनसमानाधिकरणानन्तरकालिकी व्रजनक्रियेति बोधः।
अधीत्य तिष्ठति सुप्त्वा शयस्त्वपितीत्यादौ वाध्ययनव्यापारयोरभावकाले प्रयोगात्। परापरा

११३

५७ स्यस्थितिरित्यापस्त्वनदानदाध्ययनं सुखप्यादानं चेति कालविशेषावच्छिन्नव्याप्यत्वबोधाद्व्याप्यत्वं सा
मानाधिकरण्यं च संसर्गः । एवं चान्यलभ्यत्वान्न सूत्रारंभो वाच्यत्वाभाव इति शुकमव्याप्तहतो भावेद
नि । एवं च समकर्तृकयोः क्रिययोः संसर्गो नास्यर्थस्याह कर्तृरूपं योन कर्तृत्वं क्त्वादीनां । अत एव समानक
र्तृकयोरिति सूत्रे रूपराद्देनोपात्तत्वान्नेति भाष्यप्रतीकमादाय पौर्वापर्यकाले योत्ये क्त्वादिर्विधीय
ते न तु विषये इति भाव इति कैयटः । यत्तु समानकर्तृकयोरिति सूत्रात्समानकर्तृकत्वं क्त्वाद्यर्थः । अ
न्यथौदनं पक्त्वा अहं भोक्ष्ये इत्यत्र मयेति तृतीयाप्रसंगात् । न चाख्यातेन कर्तुरभिधानात्सेति वाच्यं । भो
जनक्रियाकर्तुरभिधानेपि पाकक्रियाकर्तुस्तदभावादनभिहितेन भवतीति पर्युदासाश्रयणात् । अत
एव मासारे आस्ते इत्यत्र मसरन क्रियाधिकरणस्याभिधानेपि आस्थितिक्रियाधिकरणस्यानभिधानात्स
प्तमीति भाष्ये स्पष्टं । तस्मात्क्त्वाप्रत्ययस्य कर्तृवाचित्वमावश्यकमिति तन्न । सूत्रात्तस्य वाच्यत्वालाभा ५७

त् । समानकर्तृकयोः क्रिययोः पूर्वकाले क्त्वेत्येव तदर्थात् । अन्यथा समानकर्तरीत्येव सूत्रन्यासः स्यात् ।
तृतीयापादनं तु आख्यातार्थक्रियायाः प्रधानभूताया अभिधानात्प्रधानानुरोधेन गुणे कार्यप्रवृत्तेरि
१ ति न संभवति । उक्तं च वाक्यपदीये प्रधानेतरयोर्यत्र द्रव्यस्य क्रिययोः पृथक् । शक्तिर्गुणाश्रया तत्र प्रधानम
नुरुध्यते । प्रधानविषया शक्तिः प्रत्ययेनाभिधीयते । यदा गुणे तदा तद्वदनुक्तापि प्रतीयते इति । किं
चान्यथा कर्मणो विरुद्धार्थतापत्तिः । पक्त्वौदनो मया भुज्यत इत्यत्र द्वितीयायाः प्रकारांतरेण वारणादि
त्याख्यानावत् ॥ ५८ ॥ ॥ इति श्रीवैयाकरणभूषणसारे क्त्वाद्यर्थनिर्णयः समाप्तः ॥ ॥ सिद्धांतवा
दीनिष्कर्षमाह ॥ ॥ वाक्यस्फोटोऽतिनिष्कर्षे तिष्ठतीति मतस्थितिः । साधुशब्दान्तर्गतानां हि बोधकानां तु तत्त्व
ताः ॥ ५९ ॥ ॥ यद्यपि वर्णस्फोटः पदस्फोटो वाक्यस्फोटः अखंडपदवाक्यस्फोटौ वर्णपदवाक्यभेदेन त्रयो
जातिस्फोटा इत्यष्टौ पक्षाः सिद्धांतसिद्धा इति वाक्यग्रहणमनर्थकं दुरर्थकं च तथापि वाक्यस्फोटातिरिक्ता

नामन्येषामप्यवाचकत्वं बोधकतापत्तेरुच्चारणानंतरं बोधजननादिति ॥ अनित्यत्वाद्दूषयति । मतस्थितिर्वैयाकरणानां
५८ महाभाष्यकारप्रभृतीनां । तत्र क्रमेण सर्वांस्तान्निरूपयन् वर्णस्फोटं प्रथममाह । साधुरा द इति । साधुश
ब्दांतर्गता वाचका न चेति नियमनियतेः । नियतिकोटिरन्येषां नेति वैयाकरणानां । साधुशब्दे पचतीत्यमर
स्यादि प्रयुज्यमानेतर्गतास्तिप्विसर्गादयः बोधकावाचकास्तेषामेव शक्तत्वस्याङ्गीकरस्यापि तलात्वन
तु तैःस्मृतास्तादयः स्तादयस्त्वेस्वर्थः । पतु न प्रयोगांतर्गतास्ति वादयो न वाचकास्तेषां चटुलेन एतत्प्रानंत्या
पत्तेः । एषां च केवलेस्तादावादेशभूतलुगादेरभावरूपस्य बोधकत्वासंभवाच्च । किंतु तैःस्मृतास्तकारादिः स्मा
दयस्त्वावाचकाः । तत्वस्यजातिरूपतयाशक्ततावच्छेदकत्वोचितत्वात् । अव्यभिचाराच्च । आदेशानां भिन्नत
यापरस्परव्यभिचारित्वात् । लः कर्मणीत्यादेरनुशासनानुरोध्याच्च । तत्रादेशेष्वर्थबोधकमनुशासनमु
पलभामहे त्याह । नान्यस्यापकल्पितिभिर्निर्णीयते ॥ ॥ व्यवस्थितेत्येवंवहतेनेत्वहेतुत्वापत्तेर्न यथा । किंचा ५८

स्थानेन यत्रार्थे लडादिः स्मार्यते पचतीत्यादौ कर्तुरवाच्यत्ववाच्यत्वेन द्विभावप्रसंगः ॥ ६ ॥ ॥ अनुस्यूतानुरोधा
त्प्रयोगांतर्गता एव वाचका न तु तत्स्मारकास्त्वर्थः । तथाहि । पचतीत्यादौ लकारमविदुषां बोधान्न तस्य
वाचकत्वं । न च तेषां तिङ्क्षु शक्तिभ्रमाद्बोधः । तस्य भ्रमत्वे मानाभावात् । आदेशिनामपि तन्नैया
करणैः स्वेच्छया भिन्नानामभ्युपगमात् । कः शक्तः को नेति व्यवस्थानापत्तेश्च । सर्वेषां शक्तत्वे गौरवं व्यभि
चारश्चास्त्येवादेशानां प्रयोगांतर्गतत्वानियतत्वात् । युक्तं तेषां शक्तत्वं । तथा चादेशिस्मरणकल्पना ने
तिभावं । साधकांतरमाह । व्यवहृतेरिति । व्यवहारस्तावत् छक्तिग्राहकेषु मुख्यः । सचप्रयुज्यमानति
ङादिष्वेवेति त एव वाचकाः इत्यर्थः । किं च तद्धेतुत्वापत्तेरिति । लकारस्य बोधकत्वे भूलादंसतोपि बोधः
स्यात् । तादृशबोधे भवतीति समभिव्याहारोपि कारणमिति चेन्न । तच्च वपकत्वात्सुतां दृशसमभिव्या
हारस्यैव वाचकत्वशक्तिः । अन्यथा लकारस्य वाचकत्वं समभिव्याहारस्य कारणत्वं चेत्युभयं कल्प्यमि

तिरोधेरवं स्यात्। तथा च नादरूपसमभिव्याहारः समभिव्याहृतानां वर्णानां वाचकत्वं च विनिगमकाभावात्सर्वेषां त
५९ र्णानां वर्णा वाचका इति सिद्धान्तीति भावः। अपि च लकारस्यैव वाचकत्वे कृतिस्तोः कर्तृभावनावाचकत्वम
वस्यात्तत्सिद्धान्तसिद्धान्तस्यादित्यत आह किं चेति। आदेशानां वाचकत्वे च तिङ्त्वेन भावनायामानत्वा
दिनाकर्तरि शक्तिरित्युपपद्यते विभाग इति भावः। न च शानजादौ कृतिर्लकारार्थः आत्मनेपदः शानजर्थद्वस्य
स्तु कर्तरि लडित्यनुशासनादिति वाच्यं। स्यान्नर्थेन निराकांक्षतया शानजादौ कर्तरि लस्याप्रवृत्तेः। अ
न्यथा पचमानादावपि भवनेन। देवदत्तः पचमान इत्यादिसामानाधिकरण्यानुरोधाच्छानचः कर्ता वाच्यः
स्यादित्याशंक्याह॥ ॥नखादौ न तिङ्स्तत्र त्विमतोत्त्विर स्फुटा। नानार्थयोरभेदोपि न स्यात्तु न्योन्य
धार्थताम्॥६३॥ ॥पचति नटो मैत्रः पचति कल्पं चैत्र इत्यादिषु नानार्थत्वादभेदान्वयसंभव एवेति कर्तृवा
चकतास्यादिति भावः॥ न च पचतिकल्पमित्यत्र सामानाधिकरण्यानुरोधात्कर्तरि लक्षणा। पचमान ५९

स्य चाप्यापत्तेरिति। लः कर्मणीत्यनुशासनं च लाघवात् लत्वेनैव लकारे कर्त्रादिवाचित्वं कल्पितमात्रेपेक्षुक
म्॥ ॥इति श्रीवैयाकरणभूषणसारे स्फोटनिरूपणं॥ ॥एवमादेशानां वाचकत्वे सिद्धे परस्फोटोपि
सिद्ध एवेत्याह॥ ॥अथादेशा वाचकास्ते स्फोटस्तु न स्फुटः॥ ॥आदेशा लिङ्श्विसगादयः। अयं भावः।
समभिव्याहृतवर्णानां वाचकत्वे सिद्धे नादरूपवर्णसमभिव्याहाररूपपदस्य वाचकता सिध्यति। प्रतिवर्ण
मर्थस्मरणस्यानुभवविरुद्धत्वात्। मत्त्येकं वर्णानामर्थवत्त्वेन प्रातिपदिकत्वापत्तौ नलोपः प्रातिपदि
कांतस्येत्यादिभिर्धनं वनमित्यादौ नलोपाद्यापत्तेश्च। एतच्च चरमवर्ण एव वाचकत्वशक्तिः। एतेन्या
सत्यपूर्त्रिति लेमानाभावात्। पूर्वपूर्ववर्णानुभवजन्यसंस्कारसचरमवर्णार्थधीजनने सहकारिण इति न
तन्मात्रोच्चारणादर्थधीरिति वर्णस्फोटवादिनां मतं नांतरस्य दूषणायोक्तं। रामो रामौ इति वक्तव्ये रामस्य नंत
रं घटस्य नरमकारोच्चारणे घटबोधापत्त्या तादृशानुपूर्व्या एव शक्ततावच्छेदकत्वौचित्यादिति दिक्॥६४॥ तु

मिदं तं परमिति परिभाषितं पदस्य वाचकत्वं स्वीकृत्य खंडयन्नाह॥ ॥पदे नेत्यादि पुनर्हि प्रकृत्यादिभिरास्थि
६० तानन्वस्मात्राणि नेष्टापि संप्रमोहो हि रूपतो॥६१॥ पदे नेत्यादौ पदे इति प्रकृतिर्नेति प्रत्ययः पद इति प्रकृति
रेनेति प्रत्यय इति विभागस्य सर्वैः सर्वपदादेशा इति स्वीकारेपि विशिष्य प्रकृतिप्रत्यययोर्ज्ञानासंभवान्न
वाचकत्वमित्यर्थः। वैयाकरणैर्विभागः सुखेप इत्यतो दर्शनव्याजेनाह। वस्त्वस्मादावितिा वद्वचन
स्य वस्त्वसा वितिसमुदायस्यादेशविधानान्न च तद्विभागः संभवेन्नीत्यर्थः॥६२॥ इति पदस्फोटनि
रूपणं सुमिदं नव पदरूपवाक्यस्याचितराह॥ ॥हरेवेत्यादि दृष्ट्वा च वाक्यस्फोटं विनिश्चितुं। अर्थे वि
शिष्यसंबंधाग्रहणं चेत्सम्मं परे। लक्षणादधुना चेत्तत्र देर्थं व्यस्तु तनत्था॥६३॥ ॥हरेवविष्णोवेसा
दैपदयो रेउः पदानामित्यीत्येकादेशे सति न तद्विभागः सुज्ञानः। तथा च प्रत्येकपदज्ञानेपि समुदायश
क्तिज्ञानाच्छाब्दबोधात्समुदाये व्याचरपणशक्तिः। एवं प्रकृतिप्रत्ययेषु विशिष्याज्ञायमानेष्वपि समु ६०

९२०

दायस्यैव स्तवाबोधजनकत्वात्स्विकैव शक्तिरिति भावः। वस्तुतः पदैः पदार्थबोधवद्वाक्येन वाक्या
र्थबोध इति पदार्थशक्तिः पदेष्विव वाक्यार्थशक्तिर्वाक्ये व्युपेयेति पदवाक्यस्फोटौ व्यवस्थितौ। अ
न्यथा घटः कर्मत्वमानयनं कृतिरित्यादौ नाद्यशब्दयुत्वतिरहितस्यापि बोधप्रसंगः। पटमानये
त्यत्रैव पदार्थानामुपस्थितौ सत्यपि तात्पर्यितात्पर्यज्ञाने बोधाभावाच्च तत्रैव घटकर्मकमानय
न[redacted]मिति बोधे घटार्थकप्रातिपदिकोत्तरं कर्मत्ववाचिकविभक्तेस्ततो धातोस्ततआख्यातस्य
समभिव्याहारः कारणमिति कार्यकारणभावज्ञानवतो बोधात्तत्रानमपि हेतुरिति चेन्न हि सि
द्धो वाक्यस्फोटः। घटादिपदार्थबोधे बोधकतारूपपदशक्तिज्ञानकार्यकारणभावस्येव विशि
ष्टवाक्यार्थबोधे पदसमभिव्याहाररूपवाक्यनिष्ठबोधकतारूपवाक्यशक्तिज्ञानस्यापि हेतु
त्वकल्पनात्। अर्थोपस्थापकज्ञानविषयशब्दत्वमिति तत्कारणत्वस्यैव शक्तित्वात्। उक्तं चैतत्।

९२१

विषयतासंबंधेनशाब्दबोधमात्रे इति ज्ञानस्यस्वरूपत्वेनहेतुत्वसिद्धेः।निर्वचितंचैतद्दूषणे।ननुवाक्या
६१ र्थस्यापूर्वत्वात्कथंतत्रशक्तिग्रहःस्यात्कथंस्यात्।अर्थेइति।वाक्यस्येतिशेषः।वाक्यस्यवाक्यार्थेविशि
ष्टशक्तिग्रहणंचेत्तर्हिपदेपिसमं।पदेएवान्वयांशेशक्तिरितिपक्षेपितद्ग्रहासंभवस्तुल्यइत्यर्थः।
पदेचपदशक्तिःपदार्थांशेज्ञाताऽन्वयांशेचाज्ञातोपयुज्यतइतिकुत्रशक्तिवादिमतमपिवाक्य ५११४
शक्तिरज्ञातैवोपयुज्यतइतिवादाभ्युपगमस्तुल्यइतिभावः।ननुरद्व्यवहारंपश्यतोमनसाप
दार्थवद्वाक्यार्थेपितद्ग्रहइतिचेत्तुल्यमित्याह।लक्षणादिति।लक्ष्यतेनेनकर्मणे[illegible]नेनेतिलक्षणं
मनस्तस्मात्।अपिः।पदपदार्थयोरिवबोध्यः।पदेपिलक्षणात्तद्ग्रहस्त्वेतद्वत्सुवाक्येपीतिशेषः।स्वस्तुनन्नु
समुदितार्थेविशिष्टवाक्यस्यैवप्रथमंतद्ग्रहःआवापोद्वापाभ्यांपदंप्रत्येकंतद्ग्रहइतिबोध्यं॥३३॥इत्थ दृ
मेवमीमांसकानांवेदांतैकदेशिनांचगतिरित्याह॥ ॥सर्वत्रैवहिवाक्यार्थोलक्ष्यएवेतियेविदुः। ६१

922

भाट्टास्तेपीत्थमेवाहुर्लक्षणायान्नहेतुतां॥३४॥ ॥भाट्टाइतितदनुयायिनांवाचस्पतिकल्पतरुप्रभृतीनां।ना
मुपलक्षणं।स्पष्टमेतत्।ननुकपरसहृदयमनुपपन्नमुत्पत्तेरभिव्यक्तेर्वैकदाऽसंभवेनवर्णसमूहरूपप
दज्ञानासंभवात्।तथाचसुतरांतत्समूहरूपवाक्यज्ञानासंभवइतिचेन्न।उत्तरवर्णप्रत्यक्षसमयेत
स्मिन्नव्यवहितोत्तरत्वसंबंधेनोपस्थितपूर्ववर्णवत्त्वंतथातदुत्तरप्रत्यक्षकालेउपस्थितविशिष्टत
द्वर्णवत्त्वंतस्मिन्सुग्रहमितितादृशानुपूर्वीघटितपदत्वस्येववाक्यत्वस्यापिसुग्रहत्वात्॥३५॥ ॥इदा
नीमखंडपक्षमाह॥ ॥पदेनवर्णाविद्यंतेवर्णेष्ववयवानच।वाक्यात्पदानामत्यंतंप्रविवेकोनकश्च
न॥३६॥ ॥पदेपचतीत्यादौनवर्णाःसंतिवर्णसमूहःपदमितिभावः।दृष्टांतव्याजेनाहवर्णेष्विति।
एकारैकारऋकारलृकारादौवर्णेऽवयवाःप्रतीयमानाअपियथानेत्यर्थः।कचिदिवेत्येवपाठः।एवं
वाक्येप्याह।वाक्यादिति।पदानामपिवाक्याद्विशेषोनास्तीत्यर्थः।अयंभावः।वाक्यंपदंचाखंडमेवन

तु वर्णसमूहः। अनंतवर्णकल्पने मानाभावात्। ननु वर्णोत्सारकत्वेनाभिमतवायुसंयोगनिष्ठं न तु वर्ण
६२ जनकतायां व्यंजकतायां वावच्छेदकं। वैजात्यमादायैव ककारेण गकारस्यादिप्रतीतिः। नि वैलक्षण्यसंभवा
त्तस्य बहिर्भामात्रत्वोनारत्वादि वायुनिष्ठं च वर्णे वारोप्यत इत्युक्तं देवताधिकरणे। न चैवं वायुसंयोग
एव वाचकोपि किन्न स्यादिति वाच्यं। प्रत्यक्षोपलभ्यमानककारादेरेव वाचकत्वस्यानुभवसिद्धत्वा
त्। तथा च वाचकत्वान्यथानुपपत्त्या नेदेवेदं पदं नेदेवेदं वाक्यं सोयं गकार इति प्रतीत्या चाखंडः स्फो
टः सिध्यति। एतेन गौरित्यादौ गकारौकारविसर्गादिव्यतिरेकेण स्फोटः। ननु भवदुच्चार्यमाणवर्णाना
मेव वाचकत्वमस्त्विति स्यपास्तम्। तेषां स्फोटातिरिक्तत्वाभावात्। ननु वर्णानां प्रत्येकं वाचकत्वे प्रत्येका
दर्थबोधापत्तिः समुदायस्य तु क्रमवतामाशुतरविनाशिनां तथैवाभिव्यक्तानां वा तानमसंभवश्चेत् पू
र्वपूर्ववर्णानुभवसंस्कारसहकारेणैकदा समूहालंबनरूपैकज्ञानसंभवस्तु सतोरसः जराद्ज्ञा ६२

२
नदीदीनादिसाधारणं इत्यतिप्रसंग इति स्फोट एवाखंडो नादाभिव्यंग्यो वाचक इति वैपरः। ननु उक्तप ६३
दज्ञानसंभवस्योपपादितत्वात्। वर्णानां प्रत्येकं व्यंजकत्वं समुदितानां वेति विकल्पग्रासाच्च। ननु तन्म
ते प्येव दोषः। ननु वर्णोत्सारकत्वेनाभिमतवायुसंयोगानां प्रत्येकं व्यंजकत्वं समुदितानां वेत्यादिवि
कल्पानवसंभवादिति चेत्। उच्यते। प्रत्येकमेव संयोगा अभिव्यंजकाः। परंतु केचिद्गत्वेन केचिदौत्वे
न केचिद्विसर्गत्वेनेत्यनेकैः प्रकारैः। अत एव वर्णानां तदतिरेकात्मीकारोप्युपपद्यते। एवं चाप्यवहि
तोत्तरत्वसंबंधेन पदत्वं टकारेण गृह्यते इत्येतन्नाटपदज्ञानकरणतापायाः अविचारात्। परंत्वव्यवहितोत्त
रत्वं स्वज्ञानाधिकरणक्षणोत्पत्तिकज्ञानविषयत्वं वाच्यं। अत एव घटज्ञानानंतरज्ञानविषयत्वरूपा ६३
नुपूर्व्यादिनैयायिकरुद्धानां व्यवहारः। एवं च न कश्चिद्दोषः। एतेन पर्यायस्थले चैक एव स्फोटो नाना
नावा। नायः। घटपदे गृहीतशक्तिकस्य कलशपदाद्बोधप्रसंगात्। न च तत्पर्यायाभिव्यक्तेः शक्तिग्रह

स्तेत्यर्थापत्त्यवगतो ऽर्थधीहेतुरिति वाच्यं। एवं प्रतिपत्त्यर्थं तत्कल्पना वस्तुभावेनाननुरूपापन्नत्वात् कि
९६ ञ्च हेतुना चाप्युपपन्नत्वात्। तथा सति पदकल्पने तेनैव हेतुत्वेनोपपन्नत्वात्। अन्यथानुपपत्त्याभिन्न
कल्पितशक्तिकल्पने मानत्वे गौरवात्। न द्वितीयः। अनेन पदार्थानां तेषां किं चायं स्वरूपमवर्णे वै
कशक्तिकल्पनस्य लघुत्वादिति परिमलोक्तमपास्तं। पदार्थे नैकशक्तिस्वीकारस्य सर्वसिद्धत्वा
त्। तत्र च चेरकानुपूर्व्याः वा गुणपदार्थानादिति। शब्दकौस्तुभे तु वर्णमालायां परमिति प्रतीतेर्वर्णाति
रिक्त एव स्फोटः। अन्यथा कृपाणानिरिक्तपदासिद्धिप्रसंगश्चेति प्रतिपादितम्॥ ९५॥ ननु चैवं शास्त्रा
प्रामाण्यप्रसंगः परस्पराद्वैतत्वात् शास्त्रस्य प्रकृतिप्रत्ययविभागपरत्वादनमात्रार्थत्वादित्याशं
क्यसमाधत्ते॥ ॥पंचकोशादिवत्तस्मात्कल्पनैषा समाश्रिता। उपेयप्रतिपत्त्यर्था उपाया अव्यवस्थि
ताः॥ ९६॥ ॥उपेयप्रतिपत्त्यर्थेत्यंतेनान्वयः। अयं भावः। यथा स्फोटस्य नेदव्रत्वात्मन्यमाणमनो विज्ञानानं ९६

दमयात्मककोशपंचकप्रतिपादनं वास्तवब्रह्मबोधाय यथा वा भृगुवल्ल्यां कोशपंचकमुत्थापनं ब्र
ह्मतत्त्वबोधाय एवं प्रकृतिप्रत्ययादिमुत्थापनं वास्तवस्फोटमुत्थापनायैवेति। ननु प्रत्यस्तस्य स्फोट
बो॰ स्य च वणादितोऽपि संभवान्न शास्त्रं तदुपायत्वमाह। उपाया इति। उपायस्योपायान्तराद्दूपकत्वा
ध्य त्। तथा च व्याकरणाध्ययनजन्यज्ञानेनैवास्य कल्प्यते। मंत्रजन्यमिवार्थस्मरणे वेदांतजन्यमिव
ब्रह्मज्ञाने तस्य च ज्ञानस्य यज्ञादीनामंतःकरणशुद्धाविव शरीरादिशुद्धावुपयोगः साक्षात्परंपरया
वा स्वर्गमोक्षादिहेतुत्वं चानुपदं वाक्यपदीये। तत्द्वारमपवर्गस्य वाङ्मलानां चिकित्सितं। पवित्रं सर्व
विद्यानामधिविद्यं प्रकाशते। इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणां॥ इयं सा मोक्षमाणानामजिह्मा राज
पद्धतिः। अत्रातीतविपर्यासः केवलामनुपश्यति। ति। न वा लीक वा प्रकृतिप्रत्ययकल्पनया कल्पितत्वात् स्फो व
९७ टबोधनस्यासीकत्वासिद्धेर्वस्वमाणत्वात्। एवं रेखागवयन्यायमाह्निकमादिनागम्यते॥ ९६॥ ननु स्फोटस्य

वर्णजातीनांचनित्यतयाककारउत्पन्नइतिनस्यात्।वायुसंयोगनिष्ठजातेःस्फोटेभानेकादिप्रतीतीनांभ्र
६४ मत्वापत्तिश्चेत्यतआह॥ ॥कल्पितानामुपाधित्वंस्वीकृतंहिपरैरपि।ह्रस्वदैर्घ्यादयोयद्वन्नैर्वर्णेभ्योन्यस्य
मन्वते॥६७॥ ॥स्वीकारस्थलमाह।ह्रस्वदैर्घ्यादयोपीति।आदिनोत्पत्तिविनाशादिसंग्रहः।उदात्तत्वादि
हिनवर्णनिष्ठंतस्यैकत्वान्नित्यत्वाच्च।सएवायमितिप्रत्यभिज्ञानात्।नचगत्वावच्छिन्नप्रतियोगिता
कभेदाभावस्तद्विषयः।व्यक्त्यंशेभेदस्यापिभासमानस्यविनाबाधकंत्यागायोगात्।नचोत्पत्तिप्रती
तिर्बाधिका।प्रागसत्वेसतिसत्वरूपायाउत्पत्तेर्वर्णेष्वनुभवविरुद्धत्वात्।अतएववर्णमुच्चारयतीति
प्रयोगोनतूत्पादयतीतिप्रयोगोव्यवहारश्च।उच्चरितत्वंचताल्वोष्ठसंयोगादिजन्याभिव्यक्तिविशिष्ट
त्वम्।किंचव्यंजकध्वनिनिष्ठोत्पत्त्यादेःपरंपरयावर्णनिष्ठत्वविषयत्वेनाप्युपपत्तेर्नसातिरिक्तवर्ण
साधिका।परंपरयावर्णनिष्ठत्वाभ्युपगमाच्चनभ्रमत्वं।सासात्त्वंबंधांशेभ्रमइत्यवशिष्यतेतदपिसो ६४

यमित्यत्रव्यक्त्यभेदांशेनचभ्रमत्वंतुल्यंपरंतुममातिरिक्तवर्णतत्प्रागभावध्वंसकल्पनानेतिलाघवम
तिरिच्यते।नचवर्णस्थलेध्वनिसत्वेमानाभावः।तदुत्पादकशंखाद्यभावेनतदसंभवश्चेतिवाच्यं।ककारा
द्युच्चारणस्थलेतत्तत्स्थानस्यजिह्वयेषदंतरवानेवर्णानुत्पत्तेर्ध्वन्युत्पत्तेश्चदर्शनाज्जिह्वाभिघातज
वायुकंठसंयोगादेर्ध्वनिजनकत्वकल्पनात्तस्यचवर्णोत्पत्तिस्थलेपिसत्वात्।तत्रैवप्रतिबध्यप्रतिबं
धकभावकल्पनानिष्प्रमाणिका।स्यादितिगौरवंविपरीतं।एवंपरस्परविरोधादुदात्तत्वानुदात्तत्वह्रस्वत्वदी
र्घत्वादिकमपिनवर्णनिष्ठंयुक्तमितितेषामभिप्रायः।एवंचोत्पत्त्यादिप्रतीतीनांतत्प्रमात्वस्यचनिर्वा
हः।परेषामपिसमानइतिप्रतिबंद्येवोत्तरमितिभावः॥६७॥ ॥इत्थंचपंचव्यक्तिस्फोटः॥ ॥जाति
स्फोटमाह॥ ॥शक्यत्वइवशक्तत्वेजातेर्लाघवमीक्ष्यताम्।औपाधिकोवाभेदोस्तुवर्णानांतारमंद
वत्॥६८॥ ॥अयंभावः।वर्णास्तावदावश्यकाः।उक्तरीत्याचसोयंगकारइतिवद्योयंगकारःप्लुतःसो

पेहकारत्वमपि स्यात्।स्फोटस्यैकत्वात्।गकारोयंनहकार इत्यनापत्तेश्च।किंच स्फोटे गत्वादयः स्युर्वेयं
६५ नवा।आद्ये न देवगकारोस्तु वर्णनित्यतावादिभिरतिरिक्तगत्वानंगीकारात्।तथा चातिरिक्तस्फो
टकल्पने एव गौरवम्।अंत्ये गकारादिप्रतीतिविरोधः।वायुसंयोग इति ध्वनिरिति वा चेन्नास्यमारो
प्यनया प्रत्यय इति चेन्न।प्रतीतेर्बाधकं विनाभ्रमत्वासंभवात्।अस्तु वा वायुसंयोग एव गकारो
पि न स्यातींद्रियत्वं दोष इति चेत्तर्हि सर्वद्रुपपनेरिति कृतं स्फोटेन।तस्मात्संत्येव वर्णाः परंतु न वा
चकाः गौरवात्।आकृत्यधिकरणन्यायेन जातेरेव वाच्यत्ववद् वाचकत्वस्यापि युक्तत्वात् च।इदंह
रिपदमित्यनुगतप्रतीत्या हर्युपस्थितित्वावच्छेदेन हरिपदज्ञानत्वेन हेतुत्वात्तदवच्छेदकतया
च जातिविशेषस्यावश्यकत्वात्।न च वर्णानुपूर्व्येव प्रतीत्यवच्छेदकत्वयोर्निर्वाहः।घटपटत्वादे
रपि संयोगविशेषविशिष्टसमवायकारणादिभिर्व्याप्त्यन्यथासिद्ध्यापत्तेः।तस्मात्सा जातिरेव वाचिकामाह। ६५

त्वेन तदवच्छेदिका वेति।ननु सरो रस इत्यादौ जात्योः सत्त्वादर्थभेदबोधो न स्यादित्यत आह औपाधिको
वेति।धात्वर्थे उपाधिरानुपूर्वी सैव जातिविशेषाभिव्यंजिकेति भेदः कारणीभूतज्ञानस्येति नातिप्रसंग इ
तिभावः।उपाधिप्रयुक्तज्ञानवैलक्षण्ये दृष्टांतमाह।वर्णानामिति॥६८॥ननु जातेः प्रत्येकवर्णेष्वपि सत्त्वा
त्प्रत्येकादर्थबोधः स्यादित्यत आह॥ ॥अनेकव्यक्त्यभिव्यंग्या जातिः स्फोट इति स्मृता।कैश्चिद्व्यक्तय
एवास्या ध्वनित्वेन प्रकल्पिताः॥६९॥ ॥अनेकाभिर्वर्णव्यक्तिभिरभिव्यक्तैव जातिः स्फोट इति स्मृता।
योगार्थतया बोधिकेति यावत्।एतेन स्फोटस्यानित्यत्वात्तत्तदर्थबोधापत्तिरित्यपास्तम्।अयंभा
वः।यद्यपि वर्णस्फोटपक्षेपि दोषोस्ति तथापि पदवाक्यपक्षयोर्न तथा तस्या व्यासज्यवृत्तित्वस्य धर्मि
ग्राहकमानसिद्धत्वादिति।कैश्चिद्व्यक्तयो ध्वनय एव ध्वनिवर्णयोर्भेदाभावादित्युपेय इति शेषार्थः।
उक्तं हि काव्यप्रकाशे।बुधैर्वैयाकरणैः प्रधानीभूतस्फोटव्यंजकस्य शब्दस्य ध्वनिरिति व्यवहारः कृत

इति॥६९॥ ननु का सा जातिरित्यत आह॥ ॥सत्यासत्यौ तु यौ भागौ प्रतिभावं व्यवस्थितौ॥ सत्यं यत्तत्र सा जा
६६ तिरसत्या व्यक्तयो मताः॥७०॥ ॥प्रतिभावं प्रतिपदार्थं सत्यांशो जातिः। असत्यांशो व्यक्तयः। तत्तद्व्यक्तिवि
शिष्टं ब्रह्मैव जातिरिति भावः॥ उक्तं च कैयटेन। असत्योपाध्यवच्छिन्नं ब्रह्मतत्त्वं द्रव्यशब्दवाच्यमित्यर्थ
इति ब्रह्मतत्त्वमेव शब्दस्वरूपतया भातीति च। कथं तर्हि ब्रह्मदर्शने गोत्वादिज्ञानेरप्यसत्वादनित्यत्वं।
आत्मैवेदं सर्वमिति श्रुतिवचनादिति चेत्। वदः संगच्छताम्। अविद्या आविद्यको धर्मविशेषो वेति पक्षां
तरमादायैवेति द्रष्टव्यं॥७०॥ तमेव सत्यांशं स्पष्टयति॥ ॥इत्थं निरूप्यमाणं यच्छब्दतत्त्वं निरंजनं।
ब्रह्मैवेत्यक्षरं प्राहुस्तस्मै पूर्णात्मने नमः॥७१॥ ॥अयं भावः॥ नामरूपे व्याकरवाणीति श्रुतिसिद्धाद्
वीरदृष्टिः। तत्र रूपस्येव नाम्नोपि तदेव तत्त्वम्। प्रक्रियांशस्त्वविद्याविजृंभणमात्रम्॥ उक्तं च वाक्यप
दीये॥ शास्त्रेषु प्रक्रियाभेदैरविद्यैवोपवर्ण्यते॥ समारंभस्तु भावानामनादि ब्रह्म शाश्वतमिति। ब्रह्मैवे ६६

932

त्यनेनाप्ययं पुरुषः स्वयं ज्योतिः। तमेव भांतमनुभाति सर्वं तस्य भासा सर्वमिदं विभातीति श्रुतिसिद्धं स्वप्रका
६७ शत्वं सूचयन्स्फुरत्यर्थो यस्मादिति स्फोट इति यौगिकं स्फोटशब्दाभिधेयत्वं सूचयति॥ निर्विघ्नप्रचयायांते
मंगलं स्तुतिनिरूपमाह॥ पूर्णात्मन इत्यादिना॥७१॥ ॥अशेषफलदातारमपि सर्वेश्वरं गुरुम्॥ श्री
मद्भूषणसारेण भूषये शेषभूषणम्॥ ॥इति श्रीमत्पदवाक्यप्रमाणपारावारीणरंगोजिभट्टात्मजकौंडभ
ट्टकृते वैयाकरणभूषणसारे समाप्तोयं स्फोटः॥ ॥ग्रंथश्च समाप्तः॥ ॥राम॥ ॥

६७

933 शेवटचे पान पहा.

इतिवैयाकरण
भूषणसारः ॥